श्री

८

अष्टमस्कंधः

~~Srimad~~ Shreemad Bhagvatam

Ashtam Skandh

४

अथ

अष्टम स्कंधः

(४)

भ० अ० १ श्रीगणेशायनमः ॐनमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासायश्रीरामाय
अथाष्टमेचतुर्विंशत्यध्यायैर्मन्वंतरवर्णनं तत्सुतैर्ऋषिदेवेंद्रैर्मेत्रिभिश्चहरेःसह प्रतिमन्वंतरेचैवमन्वाद्याःपृथ
क्पृथक् प्रवर्त्तयंतिसद्धर्मानवपालयंत्याचरंतिच अत्रमन्वंतरस्योक्तंसद्धर्मैरितिलक्षणं येनवैक्रियमाणेननरोनि

राजोवाच ॥ स्वायंभुवस्येहगुरोवंशोयंविस्तराच्छ्रुतः यत्रविश्वसृजांसर्गोमनूनन्यान्वदस्वनः १ यत्रय
त्रहरेर्जन्मकर्माणिचमहीयसः गृणंतिकवयोब्रह्मंस्तानिनोवदशृण्वतां २ यद्यस्मिन्नंतरेब्रह्मन्भगवा
न्विश्वभावनः कृतवान्कुरुतेकर्त्ताह्यतीतेनागतेपिवा ॥ ३ ॥ ऋषिरुवाच ॥ मनवोऽस्मिन्व्यति
ताःषट्कल्पेस्वायंभुवादयः आद्यस्तेकथितोयत्रदेवादीनांचसंभवः ४

रयंव्रजेत् तत्रतुप्रथमेस्वायंभुवःस्वारोचिषस्तथा उत्तमस्तामसश्चेति चतुर्मन्वनुनिरूपणं स्वायंभुवे
ऽन्तरेनंतदुरंतगुणवर्णनात्त मुदितःपरिपप्रच्छसर्वमन्वंतरस्थितिम् स्वायंभुवस्येतित्रिभिः यत्रविश्वसृ
जां मरीच्यादीनांमनुकन्यासुपुत्रपौत्रादिसर्गः १ महीयसांहरेः अत्रकश्चिद्धकुपायंतरमस्तितदुपेक्षित
मस्माभिः २ यस्मिन्नतीतेयत्कृतवान् यस्मिन्ननागतेयत्कर्त्ताकरिष्यति अद्यवावर्त्तमानेयत्कुरुतेतद्वदेत्यन्वयः ३
अस्मिन्कल्पेषट्मनवोव्यतीताः ४

भा॰ अ॰ ननु सर्वं यद्विव्याप्नोति तर्हि चक्षुरादिभिः किं न प्रतीयते तत्राह यं पश्यंतं जनः चक्षुषा न पश्यति चक्षुराद्यविषय-
२ त्वात् नहि प्रमातारं प्रमाणं विषयीकरोतीति भावः तथा च श्रुतिः चक्षुषः चक्षुः श्रोत्रस्य श्रोत्रमित्यादि ननु त-
र्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येत् तत्राह यस्य तु प-
श्यतः चक्षुर्ज्ञानं न रिष्यति न नश्यति तत्तदाकारेणोत्पन्नाया वृत्तेरेव नाशो भवेत् स्वतःसिद्धज्ञानस्य नहि संवित्-
प्रकाशस्य नाशे नश्यतीति भावः भूतानि निलयो यस्य तं सर्वान्तर्यामिणं तथापि सुपर्णं शोभनपतनं असंगं धी- ५५

यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति तं भूतनिलयं देवं सुपर्णमुपधावत ११ न यस्याद्यंतौ म-
ध्यं च स्वः परो नांतरं बहिः विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् १२ स विश्वकायः पुरुहूत ईशः
सत्यः स्वयंज्योतिरजः पुराणः धत्तेस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते १३

वृत भजध्वं ११ तत्स्वरूपस्य नित्यत्वमेवोपपादयन्नाह नयस्येति अमूनि आद्यंतादीनि विश्वस्य यस्माद्भवंति वि-
श्वं च यद्रूपं अतएवाव्यभिचारित्वात् ऋतं सत्यं महत् परिपूर्णं ब्रह्म १२ ननु विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्मा-
द्यभावः स्वप्रकाशत्वं वा कथं वा जगज्जन्मादिकर्तृत्वे न विकारिणः सत्यत्वं पूर्णत्वं वा तत्राह स ईशः अजः सत्यः
स्वप्रकाशश्च पुराणश्च निर्विकारः विश्वं कायो यस्य पुरूणि हूतानि नामानि यस्य तथाविधोपि यतः अस्य विश्वस्य ज-
न्मादि स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्यया उदस्य हित्वा निष्क्रिय एवास्ते १३ २

तस्यमनोर्दुहित्रोःकपिलयज्ञमूर्त्तिभ्यांपुत्रतांप्राप्तः ५ ६ ७ घोरंदुश्चरंतपस्तप्यमानः ८ समाधावनुबभूतमि
दंवक्ष्यमाणंनिद्रितोच्छ्वसितवद्धिस्मितरवउपदिशन्निव अनुवदन्निवचअष्टभिःश्लोकैरन्वाह येनचिदात्मनावि
श्वंचेतयतेचेतनीभवति विश्वंतुयंनचेतनीकरोतिस्वतएवचिद्रूपत्वात् अत्रहेतुः यस्मिञ्छयानेस्वपिति योजाग
र्त्तिसाक्षितयावर्त्तते अहोचित्रं नायंजनस्तंवेदसतुइदंवेद ९ तस्येश्वरत्वंदर्शयंल्लोकस्यहितमुपदिशति

आकूत्यांदेवहूत्यांचदुहित्रोस्तस्यवैमनोः धर्मज्ञानोपदेशार्थंभगवानपुत्रतांगतः ५ कृतंपुराभग
वतःकपिलस्यानुवर्णितं आख्यास्येभगवानयज्ञोयच्चकारकुरूद्वह ६ विरक्तःकामभोगेषुशतरूपाप
तिःप्रभुः विसृज्यराज्यंतपसेसभार्योवनमाविशत् ७ सुनंदायांवर्षशतंपदैकेनभुवंस्पृशन् तप्यमा
नस्तपोघोरमिदमन्वाहभारत ॥८॥ मनुरुवाच ॥ येनचेतयतेविश्वंविश्वंचेतयतेनयं योजागर्त्तिशया
नेस्मिन्नायंतंवेदवेदसः ९ आत्मावास्यमिदंविश्वंयत्किंचिज्जगत्यांजगत् तेनत्यक्तेनभुंजीथामा

आत्मनाईश्वरेणआवास्यं स्वसत्ताचैतन्याभ्यांसंव्याप्यंविश्वंसर्वंजगत्यांकियत् किं गृधःकस्यस्विद्धनम् १०
चिज्जगद्गतंजातं अतस्तेनैवेश्वरेणयत्किंचित्त्यक्तंधनंनैवभुंजीथाः भोगान्भुंक्ष्व यद्वा तेनहेतुनात्यक्तेनई
श्वरार्पणेनैवभुंजीथाः नस्वार्थंकस्यचिदपिधनमागृधः माभिकांक्षीः यद्वा कस्यस्विदिति कस्यान्यस्यधनमस्ति
यतोधनाकांक्षानक्रियेतेत्यर्थः तथाचश्रुतिः ईशावास्यमितियथोश्लोकमेव १०

भा०अ० यामैःस्वपुत्रैःत्रिविष्टपंस्वर्गमपालयत् स्वयमेवेंद्रोबभूवेत्यर्थः तत्रप्रतिमन्वंतरंमन्वादयःषडन्येभवंति तथाहि सू
३ तोद्वादशेवक्ष्यति मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वराः ऋषयोंऽशावतारश्चहरेःषड्विधमुच्यतेइति तत्राद्यस्वायं

तांस्तथावसितान्वीक्ष्ययज्ञःसर्वगतोहरिः यामैःपरिवृतोदेवैर्हत्वाशासत्त्रिविष्टपं १८ स्वारोचिषोद्वितीय
स्तुमनुरग्नेःसुतोभवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्यचात्मजाः १९ तत्रेंद्रोरोचनस्त्वासीद्देवाश्च
तुषितादयः ऊर्जस्तंभादयःसप्तऋषयोब्रह्मवादिनः २० ऋषेस्तुवेदशिरसस्तुषितानामपत्यमभू
त् तस्यांजज्ञेततोदेवोविभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणिमुनयोयेधृतव्रताः अनुशि
क्षन्व्रतंतस्यकौमारब्रह्मचारिणः २२ तृतीयउत्तमोनामप्रियव्रतसुतोमनुः पवनःसृंजयोयज्ञ
होत्राद्यास्तत्सुतानृप २३ वशिष्ठतनयाःसप्तऋषयःप्रमदादयः सत्यावेदश्रुताभद्रादेवाइं
द्रस्तुसत्यजित् २४ धर्मस्यसूनृतायांतुभगवान्पुरुषोत्तमः सत्यसेनइतिख्यातोजातःसत्यव्रतैःसह २५

भुवोमनुः प्रियव्रतोत्तानपादौमनुपुत्रौयामादयोदेवाः मरीचिप्रमुखाःसप्तर्षयः यज्ञोहरेरवतारः इंद्रश्चसएवेति
तन्मन्वंतरंपंचविधमेवतच्चचतुर्थस्कंधोपक्रमेनिरूपितम् १८ द्वितीयादिषुमन्वंतरेषुमन्वादिषट्कमाह स्वा
रोचिषोद्वितीयस्तुइत्यादिनायावद्भज्जेंद्रप्रश्नं १९ विभोरसाधारणंचरितमाह सहस्राणीति २०।२१ २२ २३ २४ २५ ३

२० २१

यस्मादेवमीश्वरः कर्म कृत्वा संन्यस्य नैष्कर्म्येणास्ते अस्माद्धेतोः ऋषयोऽप्यग्रे आदौ कर्माणि कुर्वंति किमर्थं अकर्म
हेतवे मोक्षार्थं पाठांतरे कर्मनाशादि यस्मात् १४ ननु ईहमानः कर्मभिरवगुंठितः कोशकार इव बध्येतैव तत्राह ई
हत इति अतः तमनुवर्तमाना ये ते नावसीदंति न विसिज्जते १५ तदेवं कालग्रहाय विश्वसृष्ट्यादि यः करोति
श्रीरामकृष्णाद्यवतारैश्च वेदोक्तवाक्यैः शरणं व्रजामीत्याह तमिति निजकर्म नरावतारानुरूपो मार्गस्तत्र सम्यक् स्थितं

अथाग्रे ऋषयः कर्माणीहंतेऽकर्महेतवे ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते १४ ईहते भगवानीशो
न हि तत्र विसज्जते आत्मलाभेन पूर्णार्थो नावसीदंति येऽनु तं १५ तमीहमानं निरहंकृतं बुधं निराशिषं
पूर्णमनन्यचोदितं ॥ नॄन् शिक्षयंतं निजकर्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनं ॥१६॥ श्रीशुक उवा
च ॥ इति मंत्रोपनिषदं व्याहरंतं समाहितं दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा १७

अतः ईहमानं कर्माचरंतं तथापि जीववैलक्षण्यमाह निरहंकृतं निराशिषं अनन्यचोदितमिति निरहंकारत्वे हे
तुः बुधः निराशिषो हेतुः पूर्णं अनन्यनियुक्तत्वे हेतुः प्रभुं तथापि कर्मानुष्ठाने हेतुः नॄन् स्वाचारेण शिक्षयंतं
तत् किमर्थं तत्राह अखिलान् धर्मान् धारयतीति तथा तं १६ समाहितमपि संतं मंत्रोपनिषदं व्याहरंतं दृष्ट्वा सुप्तो
त्थित इव विवशमिव मन्वाना असुरा यातुधानाश्च क्षुधा निमित्तेन जग्धुं अत्तुमभ्यद्रवन् १७ रामराम ॥ ऽऽ

भा० अ० ४ तुर्य्ये मन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणं द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते द्वितीये तु गजेंद्रस्य गजीभिः
क्रीडनं जले देवाद्ग्राहग्रहीतस्य हरिस्मृतिरुदीर्य्यते आसीदस्ति १ तावता योजनायुतेन पर्य्यक् परितः त्रिकूट
समाख्याबीजमादित्रिभिः शृंगैर्मुख्यैः अन्यैश्च शृंगैर्निर्झरांभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्ते इति य

श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः क्षीरोदेनावृतः श्रीमान्योजनायुत
मुच्छ्रितः १ तावता विस्तृतः पर्य्यक् त्रिभिः शृंगैः पयोनिधिं दिशः खं रोचयन्नास्ते रौप्यायसहि
रण्मयैः २ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झ
रांभसां ३ स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः करोति श्यामलां भूमिं हरिन्म
रकताश्मभिः ४ सिद्धचारणगंधर्वविद्याधरमहोरगैः किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्ट
कन्दरः ५ यत्र संगीतसन्नादैर्नदद्गुहममर्षया अभिगर्ज्जंति हरयः श्लाघिनः परशंकया ६

वेलेवान्वयः कथंभूतैः शृंगैः रत्नैः धातुभिश्च विचित्रितैः नानाविधाद्रुमलतानां गुल्मा येषु तैः २ ३ पयऊ
र्मिभिः समंतादवनिज्यमाना अंघ्रयो मूलप्रांता यस्य हरिद्भिः पालाशवर्णैः ४ ५ किन्नरादीनां संगीतस
न्नादैः नदंत्यो गुहा यस्मिन्प्रदेशे तं अभिगर्ज्जंति हरयः सिंहाः अमर्षया असहनेन ॥ ६ ॥ ः ॥ ४

सत्यजित इंद्रस्य सखा सन् २६ उत्तमस्तृतीयो मनुः तस्य भ्राता तामसः चतुर्थो मनुरिति · त्रिशिखः ईश्वरः इंद्रः २८ अन्यान्
विशिष्टपराक्रमान् देवानाह देवा वैधृतयइति २९ हरिरित्याहूतः व्याहृतः ग्रहग्रस्त ग्राहात् ३० अमूमुचत् मोचयामा

सोऽन्वतप्यत दुःशीलानसतो यक्षरक्षसान् भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सखः २६ चतुर्थ उत्तम
भ्राता मनुर्नाम्ना च तामसः पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः २७ सत्यका हरयो वीरा देवास्त्रिशि
ख ईश्वरः ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽपरे २८ देवा वैधृतयो नाम विधृतेस्तनया नृप नष्टाः
कालेन यैर्वेदा विधृताः स्वेन तेजसा २९ तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः हरिरित्याहृतो येन ग
जेंद्रो मोचितो ग्रहात् ॥३०॥ राजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयं हरिर्यथा गजपतिं ग्राहग्र
स्तममूमुचत् ३१ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं महत् यत्र यत्रोत्तमश्लोको गीयते भगवान्
हरिः ३२ ॥सूत उवाच॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः उवाच विप्राः प्रति
नंद्य पार्थिवं ॥ मुदा मुनीनां सदसि स्म शृण्वतां ॥३३॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे मन्वंत
रानुवर्णने प्रथमोऽध्यायः ॥१॥

स ३१ तत्कथासु तासु कथासु ॥ कथ्येव वा सु महत् पुण्यं पुण्यविशेषणं धन्यमित्यादि ॥३३॥ इत्यष्टमप्रथमः ॥१॥

तस्मिन्गिरौसरश्चास्ते तद्वर्णयन्तिस्मविपुलरत्यादिसार्द्धैः पंचभिः लसंतिकांचनपंकजानियस्मिन् १४ कु
मुदादीनांश्रियाकूर्जितम् कलःस्वनोयेषांतैश्चनिर्घुष्टं १५ चक्राह्वैः सारसैरप्याकीर्णं जलकुक्कुटादीनांकू

बिल्वैःकपित्थैर्जंबीरैर्वृतोभल्लातकादिभिः तस्मिन्सरस्सुविपुलंलसत्कांचनपंकजं १४ कुमु
दोत्पलकह्लारशतपत्रश्रियोर्जितं मत्तषट्पदनिर्घुष्टंशकुंतैश्चकलस्वनैः १५ हंसकारंडवाकी
र्णंचक्राह्वैःसारसैरपि जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं १६ मत्स्यकच्छपसंचारचलत्प
द्मरजःपयः कदंबवेतसनलनीपवंजुलकैर्वृतम् १७ कुंदैःकुरवकाशोकैःशिरीषैःकुटजेंगुदैः
कुब्जकैःस्वर्णयूथीभिर्नागपुन्नागजातिभिः १८ मल्लिकाशतपत्रैश्चमाधवीजालकादि
भिः शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः १९ तत्रैकदातद्गिरिकाननाश्रयःकरेणुभि
र्वारणयूथपश्चरन् सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मंप्ररुजन्वनस्पतीन् २०

लैःकूजितं १६ मत्स्यानांकच्छपानांचसंचारेणचलतांपद्मानांरजसायुक्तंपयोयस्मिंस्तत् १७ १८ नित्यमृतवःफ
लपुष्पादिसंपत्तिहेतवोयेषांतैरलंशोभितं १९ तत्रैववसति एकदातत्गिरिकाननाश्रयोवारणयूथपःकरेणुभि
श्चरन् तृषार्द्दितेनयूथेनवृतःसरोवरस्याभ्यासंसमीपंगमादितिपंचभिरन्वयः किंकुर्वन् कीचकवेणुवेत्र

वंतंविशालंगुल्मंलतादिसंदर्भंवनस्पतींश्चप्रहृज्जन्प्रभंजन् २०

नानाये ऽरण्यपशवस्तेषां व्रातैः संकुलाभिः अलंकृतः आस्ते किंच चित्रा द्रुमा येषु सुरोद्यानेषु कलकंठा मधुर
स्वना विहंगमा यस्मिन् ७ किंच स्वच्छोदकैः सरित्सरोभिर्युतः मणय इव वालुका येषु तैः पुलिनैश्च पुनः देवनः
देवस्त्रीणां मज्जनेन यत्र आमोदस्तेन सौरभे युक्तानि अंबूनि अनिलाश्च युत आस्ते ८ तस्य द्रोण्यां वरुणस्योद्या

नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः विचित्रद्रुमसुरोद्यानकलकंठविहंगमः ७ सरित्स
रोभिरच्छोदैः पुलिनैर्मणिवालुकैः देवस्त्रीमज्जनामोदसौरभांभोनिलैर्युतः ८ तस्य द्रोण्यां भ
गवतो वरुणस्य महात्मनः उद्यानमृतुमन्नाम आक्रीडं सुरयोषितां ९ सर्वतोलंकृतं दिव्यैर्नि
त्यपुष्पफलद्रुमैः मंदारैः पारिजातैश्च पाटलाशोकचंपकैः १० चूतैः पियालैः पनसैराम्रैरा
म्रातकैरपि क्रमुकैर्नारिकेरैश्च खर्जुरैर्बीजपूरकैः ११ मधुकैः शालतालैश्च तमालैरसनार्जु
नैः अरिष्टोडुंबरप्लक्षैर्वटैः किंशुकचंदनैः १२ पिचुमर्दैः कोविदारैः सरलैः सुरदारुभिः द्राक्षे
क्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः १३

नमास्ते ९ गिरिवनादि सर्वं वर्ण्यमिति वक्ष्यति अतो गिरिमुपवर्ण्य वनं वर्णयति सर्वतोऽलंकृतमिति गि
रिं पुनर्वर्णयति मंदारादिभिर्दैतद्रित्यन्वयः १० ११ १२ १३ ॥ ऽऽ ॥ ऽऽ ऽऽ ॥ ऽऽ

भा० अ० दीनधियः करेणवः तं केवलं विचुक्रुशुः २८ २९ मनउत्साह शक्तिः बलंशरीरं ओजइंद्रियं तेषांसकलं
६ चलादिविपर्य्ययोविपरीतं अधिकंजलौकसोग्राहस्य ३० सइत्थं प्राणसंकटमाप यतोदेही ३१ बुद्धिमेवा
हनमामीति अहंचनप्रभवामि यतःग्राहरूपेण केवलं विधातुःपाशेनावृतः तथापितंपरंपरमेश्वरंपरेषांब्रह्मा

तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहा
स्तारयितुंनचाशकन् २८ नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरंतरतोबहिर्मिथः समाः सहस्रंव्य
गमन्महीपते सप्राणयोश्चित्रममंसतामराः २९ ततोगजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण म
हानभूद्व्ययः विकृष्यमाणस्य जलेवसीदतोविपर्ययोभूत्सकलंजलौकसः ३० इत्थंगजेन्द्रः स
यदाप संकटं प्राणस्य देही विवशो यदृच्छया अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथा
भिपद्यतः ३१ नमामिमेज्ञातयआतुरंगजाः कुतः करिण्यः प्रभवंति मोचितुं ग्राहेणपाशेन विधा
तुरावृतोप्यहं च तं यामि परं परायणं ३२ यः कश्चनेशो बलिनोंऽतकोरगात्प्रचंडवेगादभिधावतो भृ
शं भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ३३

दीनामाश्रयभूतं शरणं यामि ३२ कोसौयं शरणं यासि तत्राह यः कश्चनेति अंतकएवोरगः तस्मात्तं शरणमीम
हि व्रजेमः यद्भयादित्यत्र श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति

गजेन्द्र ६

कथंभूतः यस्यगंधमात्राद्धरयः सिंहाः गजेंद्रादयश्च भयाद्द्रवंतिपलायंते २१ वृकादयस्तुक्षुद्रा अल्पप्राणिनः

यद्गंधमात्राद्धरयोगजेंद्रव्याघ्रादयोव्यालमृगाःसखड्गाः महोरगाश्चापिभयाद्द्रवंतिसगौरकृष्णाःसरभा
श्चमर्यः २१ वृकावराहामहिषर्क्षशल्यागोपुच्छशालावृकमर्कटाश्च अन्यत्रक्षुद्राहरिणाःशशा
दयश्चरंत्यभीतायदनुग्रहेण २२ सघर्मतप्तःकरिभिःकरेणुभिर्वृतोमदच्युत्कलभैरनुद्रुतः गिरिं
गरिम्णापरितःप्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः २३ सरोऽनिलंकंजसरेणुरूषितंजिघ्रन्
विदूरान्मदविक्लवेक्षणः वृतःस्वयूथेनतृषार्दितेनतत्सरोवराभ्यासमथागमद्द्रुतं २४ विगा
ह्यतस्मिन्नमृताम्बुनिर्मलंहेमारविंदोत्पलरेणुभावितं पपौनिकामंनिजपुष्करोद्धृतमात्मान
मद्भिःस्नपयन्गतक्लमः २५ सपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथागृही
घृणीकरेणुःकलभांश्चदुर्मदोनाचष्टकृच्छ्रंकृपणोऽजमायया २६ तंतत्रकश्चिन्नृपदैवचो
दितोग्राहोबलीयांश्चरणेरुषाग्रहीत् यदृच्छयैवंव्यसनंगतोगजोयथाबलंसोतिबलोविचक्र
मे २७

अन्यत्रनदृष्टिपथंत्यक्त्वाचरति २२ पुनःकीदृशः घर्मतप्तः मदच्युत् वदस्रावीतितथातैः २३ २४
निजेनपुष्करेणकराग्रेणोद्धृतंगतक्लमःसन्तृप्तिकामंपपौ २५ २६ २७

भा० अ० विश्वहेतुत्वं स्वतःसिद्धत्वं चोक्तं इदानीं विश्वप्रकाशकत्वं चवर्णयन्प्रार्थयते यःस्वात्मनीति विभातं अभिव्यक्तं सत्
७ क्वचित्प्रलये तिरोहितं लीनं सत् तदुभयं कार्यकारणं च साक्षी सन्नीक्षते साक्षित्वे हेतुः अविद्धदृक् अलुप्तदृष्टिः आ
त्ममूलः स्वप्रकाशः कुतः परावरप्रकाशकात् चक्षुरादेरपि परः तस्यापि प्रकाशक इत्यर्थः चक्षुषश्चक्षुरित्यादि
श्रुतेः ४ तिरोहितमित्युक्तं तत्प्रपंचपूर्वकं दुर्ज्ञेयत्वं वदन्प्रार्थयते कालेनेति द्वाभ्यां पंचत्वमितेषु गहनं दु

यःस्वात्मनीदंनिजमाययार्पितं क्वचिद्विभातं क्वचतत्तिरोहितं अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्म
मूलोवतु मां परात्परः ४ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु तमस्तदासीद्गह
नं गभीरं यस्तस्य पारेभिविराजते विभुः ५ न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोर्हति गंतुमीरितुं य
था नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ६ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मु
नयः सुसाधवः चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ७

रवगाहं गंभीरं अनंतं तस्य तमसः आदित्यवर्णं तमसः परस्तादिति श्रुतेः ५ अत एव देवादयो यस्य स्वरूपं न वि
दुर्जंतुरर्वाचीनः गंतुं ज्ञातुं ईरितुं वक्तुं वा दुरत्ययं दुर्गममनुक्रमणं चरित्तं कथनं वा यस्य सः मां अवतु ६ कथं न हि तमे
वविदित्वा अतिमृत्युमेति इत्यादि श्रुतिरित्याशंक्य तज्ज्ञानोपायं कथयन्नाह दिदृक्षव इति अलोकव्रतं ब्र
ह्मचर्यादि अव्रणं अछिद्रं भूतानामात्मभूताः भूतेष्वात्मदृष्टयः संतः स मे गतिरस्तु ७ ७

इत्यष्टमे द्वितीयः ॥ २ ॥ तृतीये तु गजेंद्रेण स्तुतो हरिरुपेत्य तं समुद्दधारे भं ग्राहाद्ग्राहं देवलशापतः जाप्यं जपंस्तो
त्रं प्राग्जन्मनि इंद्रद्युम्नसंज्ञे ॥ १ ॥ तस्मै नमो नमनं अभिधीमहि अभिध्यायेम केवलं ग्राहगृहीतत्वेन कायप्रणत्वे
रशक्यत्वात् ॥ स्वस्य तज्ज्ञानं संभावयितुं विशिनष्टि यतश्चिद्रूपात् एत देहादि चिदात्मकं चेतनं भवति तदुक्तं ये

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे गजेंद्रोपाख्याने नाम द्वितीयोध्यायः ॥ २ ॥ श्रीबादरायणि
रुवाच ॥ एवं व्यवसितो बुद्ध्या समाधायो मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितं १
गजेंद्र उवाच ॥ नमो भगवते तस्मै यत एतच्चिदात्मकं पुरुषायादिबीजाय परेशायाभिधीमहि
२ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ३ ॥

न चेतयते विश्वमिति अहेतुः पुरुषाय पुंसु कारणत्वेन प्रविष्टाय ननु प्रकृतिपुरुषौ कारणमिति प्रसिद्धिस्तत्रा
ह आदिः प्रकृतिः बीजं पुरुषः तद्रूपाय प्रविष्टत्वेपि जीववत्पारतंत्र्यं वारयति परेशायेति २ परमैश्वर्यं विवृ
ण्वन्नाह यावत्समाप्ति यस्मिन्नधिष्ठाने यत उपादानात् येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्या
त् परस्मात्कारणाच्च यः परस्तं स्वयंभुवं स्वतः सिद्धं प्रपद्ये शरणं व्रजामि ३

इत्यष्टमे द्वितीयः ॥ २ ॥ तृतीये तु गजेंद्रेण स्तुतो हरिरुपेत्य तं समुद्दधारे भं ग्राहाद्ग्राहं देवलशापतः जाप्यं जप्यं स्तो
त्रं प्राग्जन्मनि रिंद्रद्युम्नसंज्ञे ॥ १ ॥ तस्मै नमो नमनं अभिधीमहि अभिध्यायेम केवलं ग्राहगृहीतत्वेन कायप्रणत्वे
रशक्यत्वात् ॥ स्वस्यैतज्ज्ञानं संभावयितुं विशिनष्टि यतश्चिद्रूपात् एन देहादि चिदात्मकं चेतनं भवति तदुक्तं ये

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे गजेंद्रोपाख्याने नाम द्वितीयोध्यायः ॥ २ ॥ श्रीबादरायणि
रुवाच ॥ एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितं १
गजेंद्र उवाच ॥ नमो भगवते तस्मै यत एतच्चिदात्मकं पुरुषायादिबीजाय परेशायाभिधीमहि
२ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ३ ॥

न चेतयते विश्वमिति अहेतुः पुरुषाय पुर्षु कारणत्वेन प्रविष्टाय ननु प्रकृतिपुरुषौ कारणमिति प्रसिद्धिस्तत्रा
ह आदिः प्रकृतिः बीजं पुरुषः तद्रूपाय प्रविष्टत्वेपि जीववत्पारतंत्र्यं वारयति परेशायेति २ परमैश्वर्यं विवृ
ण्वन्नाह यावत्समाप्ति यस्मिन्नधिष्ठाने यत उपादानात् येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्या
त् परस्मात्कारणाच्च यः परस्तं स्वयंभुवं स्वतः सिद्धं प्रपद्ये शरणं व्रजामि ३

साक्षित्वेपिसर्वाध्यक्षत्वेपिनिर्विकारत्वमुक्तं आत्मनांदेहेनज्ञानांमूलाय मूलस्यप्रधानस्यापिप्रकृतयेतद्ग्र
वहेतवे तत्रहेतुः पुरुषायपूर्वमेवासत्ते तथाचश्रुतिः पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमितिपू
र्णायमितिवा १० सर्वेन्द्रियाणांयेगुणाःविषयास्तेषांद्रष्ट्रे सर्वप्रत्ययाइंद्रियवृत्तयोहेतवोज्ञापकायस्यत
स्मै तदेवाह असताअहंकारादिप्रपंचेन छाययाअसद्रूपयाउक्ताय प्रतिविंवेनविंवमिवसूचिताय तत्रहे

क्षेत्रज्ञायनमस्तुभ्यंसर्वाध्यक्षायसाक्षिणे पुरुषायात्ममूलायमूलप्रकृतयेनमः १० सर्वेंद्रि
यगुणद्रष्ट्रेसर्वप्रत्ययहेतवे असताछाययोक्तायसदाभाषायतेनमः ११ नमो नमोनमस्ते
खिलकारणायनिःकारणायाद्भुतकारणाय सर्वागमाम्नायमहार्णवायनमोपवर्गाय
परायणाय १२

तुः सद्रूपोविषयेष्वाभासोयस्यतस्मै तदुक्तंतृतीये यथाजलस्थआभासइत्यादिना पाठांतरेअसत्यस्यछा
यया अध्यासेन अक्ताय अयुक्ताय तदधिष्ठानायेत्यर्थः ११ अखिलकारणाय सर्वकारकरूपाय अतएवस्व
यंनिःकारणाय कारणत्वेपिमृदादिवद्विकारंवारयति अद्भुतकारणायेति एवंभूतत्वेप्रमाणमाह सर्वे आगमाः
पंचरात्रादयः आम्नायश्चवेदास्तेषामहार्णवायस्रोतसामिवपर्य्यवसानस्थानाय अपवर्गाय मोक्षरूपाय अतःप

दुरत्ययानुक्रमणत्वंप्रपंचयन्प्रणमति नविद्यतेइत्यादिना लोकानामपायः प्रलयः संभवोजन्म तयो
र्हेतुकं तदर्थंयस्तानिजन्मादीनिस्वीकरोति तस्मैनमइत्युत्तरेणान्वयः ब्रह्मणेअरूपाय अनंतशक्त
येउरुरूपाय आश्चर्याणिकर्माणियस्य तस्मैपरेशायनमः ६ आत्मप्रदीपाय प्रकाशांतरस्याविषया

नविद्यतेयस्यचजन्मकर्मवा ननामरूपेगुणकर्मएववा तथापिलोकाप्ययसंभवाय यः स्वमा
ययातान्यनुकालमृच्छति तस्मैनमःपरेशायब्रह्मणेऽनंतशक्तये अरूपायोरुरूपायनमआश्च
र्यकर्मणे ६ नमआत्मप्रदीपायसाक्षिणेपरमात्मने नमोगिरांप्रदीपायमनसाचेतसाम
पि ७ सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता नमःकैवल्यनाथायनिर्वाणसुखसंविदे ८
नमःशांतायघोरायमूढायगुणधर्मिणे निर्विशेषायसाम्यायनमोज्ञानघनायच ९

य स्वतः साक्षिणेप्रकाशाय परात्मनेजीवनियंत्रे अतएवगिरांविदूराय अप्राप्यायचेतसांचित्तवृत्तीनां त
थाचश्रुतिः यतोवाचोनिवर्त्तंते अप्राप्यमनसासहेति ७ एवमपिविपश्चितानिपुणेननैष्कर्म्येणसंन्यासेन सत्वे ६४
नसिद्धेनसंन्यासयोगाद्यतयःशुद्धसत्वाइतिश्रुतेः प्रतिलभ्यायप्रत्यक्त्वेनप्राप्याय निर्वाणसुखसंविदे मोक्षा श्री
नंदानुभूतये ८ गुणधर्मिणे सत्वादिधर्मानुकारिणे ज्ञानघनायचेति निर्विशेषत्वेनित्यप्रधानवैलक्षण्यमु

भा० अ० ९

इष्टां गतिं कामित्वधर्मादि फलं प्राप्नुवंत्येव न तु तावदेव किंतु यास्तैरकामिता अन्याश्च आशिषो राति देहमव्ययं
राति स एवं यः अदभ्रदयः स मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थ्यं १६ एतावद्दूप्यहं भक्तिसुखान
भिज्ञत्वेन वांछामि यस्य त्वेकांतभक्ता न किंचिदर्थं वांछंति परमेश्वरमीडे स्तौमीत्युत्तरेणान्वयः तेषां नि
ष्कामत्वे हेतुः ये वै भगवतः सर्वज्ञान्मुक्तान प्रपन्नाः सेवितवंतः १७ अत्यद्भुतसुमंगलत्व प्रदर्शनार्थमक्षर ९

यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति किंत्वाशिषो रात्यपि देहमव्ययं
करोतु मेदभ्रदयो विमोक्षणं १६ एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः अत्य
द्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः १७ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयो
गगम्यं अतींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे १८ यस्य ब्रह्मादयो देवा वेदा लोका
श्चराचराः नामरूपविभेदेन फल्ग्व्या च कलया कृताः १९ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति सं
यांत्यसकृत्स्वरोचिषः तथा यतोयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः २०

त्वादिविशेषणानि १८ परिपूर्णत्वं दर्शयन्नाह त्रिभिर्यस्येति फल्ग्व्या च स्वल्पयैव कलयांशेन कृताः स
जयतादिति तृतीयेनान्वयः १९ कथं कृता इत्यपेक्षायां दृष्टांतौ यथार्चिषोऽग्नेरिति प्रवाहे दृष्टांतः सवितुर्ग
भस्तय इत्यानंत्ये निर्यांति उद्गच्छंति संयांति लीयंते गुणसंप्रवाहमेवाह बुद्धिर्मनः खानीति करणानि शरीर

गुणाएवारणिस्तयाछन्नश्चिदुष्मयाज्ञानाग्निस्तस्मै तेषांगुणानांक्षोभेकार्येविस्फूर्जितंवहिर्वृत्तिकंमानसंयस्य
सोकामयतवहुस्यामितिश्रुतेः नैष्कर्म्यमात्मतत्वं तस्यभावेनभावनयाविवर्जिता आगमाविधिनिषेधलक्ष
णायैस्तेषुस्वयमेवप्रकाशायस्यतस्मै १३ मादृक्महद्विधश्चासौप्रपन्नःपशुस्तस्यपाशोऽविद्यातस्याविशेषेणमो
क्षयेन तत्रयोग्यतामाह मुक्ताय मोचनेहेतुः भूरिःकरुणायस्य अतस्तत्रार्थेलयाय अनलसाय स्वांशेनांतर्या

गुणारणिछन्नचिदुष्मयायतत्क्षोभविस्फूर्जितमानसाय नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशा
यनमस्करोमि १३ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्तायभूरिकरुणायनमोलयाय स्वांशेनसर्व
तनुभृन्मनसिप्रतीतप्रत्यग्दृशेभगवतेवृहतेनमस्ते १४ आत्मात्मजाप्तगृहवित्तजनेषुसक्तैर्दुष्प्राप
णायगुणसंगविवर्जिताय मुक्तात्मभिःस्वहृदयेपरिभावितायज्ञानात्मनेभगवतेनमईश्वराय १५

मिरूपेणसर्वेषांतनुभृतांमनसिप्रतीताप्रख्यातायाप्रत्यक्दृक् तस्मै तथाचश्रुतिः यआत्मनितिष्ठन् आ
त्मानमंतरोयमयतीति भगवते सर्वेषांतनुभृतांनियमनसमर्थाय तेषांमनसिस्थितत्वेपिवृहते अपरिछि
न्नाय १४ आत्मस्थत्वेपिदेहादिष्वासक्तैर्दुःप्रापणाय प्राप्तुमशक्याय तत्रहेतुः गुणसंगेनविवर्जिताय
अतएवमुक्तात्मभिर्देहादिष्वनाशक्तैश्चिंतिताय तैःपरिभावितंरूपमाह ज्ञानात्मनइत्यादि १५ ॥ ६६ ॥

भा० अ० तर्हि सर्वेपि योगमपि किं नास्थितास्तत्राह नम इति द्वाभ्यां असह्यो वेगो रागादि लक्षणो यस्य तथाभूतं शक्ति
१० त्रयं यस्य तस्मै वहिरखिलधियां सर्वेन्द्रियाणां गुणाय शब्दादिरूपेण प्रतीयमानाय अतः कदिंद्रियाणां
कुत्सितानीन्द्रियाणि येषां तेषामनवाप्यं तत्वर्त्म यस्य २५ यच्छक्त्यायस्य मायया अहंधीस्तयापहतं आत्मानं

नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय प्रपन्नपालाय दुरंतशक्तये कदिं
द्रियाणामनवाप्यवर्त्मने २५ नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतं तं दुरत्ययमाहा
त्म्यं भगवंतमितोस्म्यहं २६ ॥ श्रीशुक उवाच ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो वि
विधलिंगभिदाभिमानाः नैते यदोपससृपुर्निखिलात्मकत्वात् तत्राखिलामरमयो हरिरा
विरासीत् २७ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः छंदोम
येन गरुडेन समुह्यमानश्चक्रायुधोभ्यगमदाशु यतो गजेन्द्रः २८

यं जनो न वेद दुरत्ययं माहात्म्यं यस्य
तं इतः आश्रितोस्मि २६ उपवर्णितं निर्विशेषं मूर्त्तिभेदं विना परं तत्वं येन तं विविधा या लिंगभिदा मू
र्त्तिभेदस्तस्याभिमानो येषां अतएते यदा नोपजग्मुस्तदा अखिलामरमयः सर्वदेवमयमूर्त्तिः २७ दि
विजैः देवैः सह छंदोमयेनेति शेषग्रा योज्यं २८

१०

अतएवदेवादीनांमध्येकोपिनभवति नतंतुः लिंगत्रयशून्यंप्राणिमात्रमपि किंतुसर्वस्यनिषेधे अवधित्वशिष्यत
इतिनिषेधशेषः माययाअशेषात्मकंसृजयतात् मोक्षणायाविर्भवतु २१ नचग्राहाच्छरीरस्यमोक्षणेनाहंजीवितुमि
च्छामि तत्रहेतुः अमुयाअंतर्बहिश्चाविवेकव्याप्तयागजजात्याकिंप्रयोजनं आत्मलोकस्य आत्मप्रकाशस्ययदाव
रणमज्ञानं तस्यैवतुमोक्षस्यकालेननाशोनास्ति यद्वा देहसंबंधोदेहनाशेनश्येदेव किंतन्मोक्षप्रार्थनेनाह अ

सवैनदेवासुरमर्त्यतिर्यङ्नस्त्रीनषंडोनपुमान्नजंतुः नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयता
दशेषः २१ जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या इच्छामिकालेननयस्यविप्ल
वस्तस्यात्मलोकावरणस्यमोक्षं २२ सोहंविश्वसृजंविश्वमविश्वंविश्ववेदसं विश्वात्मानमजं
ब्रह्मप्रणतोस्मिपरंपदं २३ योगरंधितकर्माणोहृदियोगविभाविते योगिनोयंप्रपश्यंतियोगिनं
तंनतोस्म्यहं २४

त्मलोकावरणस्यतुकालेनविप्लवोनास्ति ज्ञानैकनिवर्त्यत्वात् अतस्त
स्यैवमोक्षमिच्छामीत्यर्थः सोहंमुमुक्षुर्विश्वंविश्वरूपं अविश्वंव्यतिरिक्तंच विश्वंवेदोधनंउपकरणंयस्यतं
विश्वस्यआत्मानंचकेवलंप्रणतोस्मि नतुतंजानामि २३ योगंविनादुर्ज्ञानत्वात् योगेभगवद्धर्मेणरंधितानिक
र्माणियेषांतेयंपश्यंति २४

भा० अ० कथंभूतं यशसो धाम आश्रयं अतः कीर्तनीया गुणाः सती कथा च यस्य तं ४ स्वं लोकं गंधर्वलोकं ५ ६ ७ कुला
११ चलो मलयाद्रौ वा आश्रमो यस्य ८ तूष्णीं रहसि उपासीनं वीक्ष्य ९ शापमेवाह असाधुरित्यादि अकृतो अशिक्षि

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं अगायत यशोधाम कीर्तन्यगुणसत्कथं ४ सोनुकंपित
ईशेन परिक्रम्य प्रणम्य तं लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ५ गजेंद्रो भगवत्स्पर्शा
द्विमुक्तो ज्ञानबंधनात् प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ६ स वै पूर्वमभूद्राजा पांड्यो द्र
विडसत्तमः इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ७ स एकदाराधनकाल आत्मवान् गृहीतमौ
कु ५ नव्रत ईश्वरं हरिं जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ८ यदृच्छया तत्र म
हायशा मुनिः समागमच्छिष्यगणैः समावृतः तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषि
श्चुकोप ह ९ तस्मा इमं शापमदादसाधुरयं दुरात्माकृतबुद्धिरद्य विप्रावमंता विशतां तमोऽन्धं यथा
गजः स्तब्धमतिः स एव ॥ १० ॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान् सपसानुगः इंद्रद्युम्नोऽ
पि राजर्षिर्दिष्टं तदुपधारयन् ११

तावुक्तिर्यस्य गजो यथा स्तब्धमतिस्तथैवायं अतः स एव गजपतिर्भवत्विति शेषः १० दिष्टं दैवादापतितं तदुपधा १९

खेदृष्ट्वा उपात्तं उद्यतं चक्रं येन २९ गरुडोपि मंदगतिरिति ततः सहसावतीर्य्य अरिणा चक्रेण विपाटितं मुखं यस्य
उच्छ्रियाणां देवानां ३०॥ इत्यष्टमे तृतीयः॥३॥ चतुर्थे तु तयोर्ग्राहः प्राप गंधर्वतां पुनः गजं स्वपार्षदं कृत्वा हरिर्निन्ये
निजं पदं १ २ हूहूसंज्ञो गंधर्वसत्तमः असौ देवलस्य शापेन ग्राहो जातः स वेतनः सद्यो मुक्तः सन्नुत्तमश्लो

सोऽतः सरस्युरुबलेन गृहीत आर्त्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं उत्क्षिप्य सांबुजकरं गिरमा
हकृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते २९ तंब्रीडितं गजमजः सहसावतीर्य्य सग्राहमाशुसर
सः कृपयोज्जहार ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुच्छ्रियाणां ३०॥ इति श्री
मद्भागवते महापुराणेऽष्टमस्कंधे गजेंद्रमोक्षे तृतीयोऽध्यायः॥३॥ श्रीशुक उवाच॥ तदा देवर्षिगं
धर्वा ब्रह्मेशानपुरोगमाः मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः १ नेदुर्दुंदुभयो दिव्या गंधर्वा न
नृतुर्जगुः ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं २ योऽसौ ग्राहः स वै सद्यः परमाश्चर्य्यरूपधृक्
मुक्तो देवलशापाद्वै हूहूर्गंधर्वसत्तमं ३
कर्म गायते त्यन्वयः एवहीतिहासोत्तमकथा सरसि स्त्रीभिः क्रीडन्नसौ स्नाने प्रविष्टं देवलं पादे प्रगृह्य विचकर्ष
स च प्रकुपितो ग्राहो भवेति शशाप तेन च प्रसादितः सन्नुवाच एवमेव गजेंद्रग्रहमोक्षो भव ततश्च गजेंद्रमुद्धरन् हरि

भा०अ० २०२१ अव्यक्तंमायां अव्ययंधर्मंभक्तिलक्षणं सोमकश्यपयोरपिपत्नीः दाक्षायणीः २२ सितवारणंऐरावतं २३
१२ सुसमाहिताः एकाग्रचित्ताः ममरूपाणिमद्विभूतीः २४ २५ जलजोत्तमंशंखवरं प्राध्मायवादयित्वा २६ इ

शेषंचमत्कलांसूक्ष्मां श्रियंदेवींमदाश्रयां ब्रह्माणंनारदमृषिंभवंप्रह्लादमेवच २० मत्स्यकूर्मवराहा
द्यैरवतारैःकृतानिमे कर्माण्यनंतपुण्यानिसूर्यंसोमंहुताशनं २१ प्रणवंसत्यमव्यक्तंगोविप्रान्ध
र्ममव्ययं दाक्षायणीर्धर्मपत्नीःसोमकश्यपयोरपि २२ गंगांसरस्वतींनंदांकालिंदींसितवारणं ध्रु
वंब्रह्मर्षीन्सप्तर्षीन्पुण्यश्लोकांश्चमानवान् २३ उत्थायापररात्रांतेप्रयताःसुसमाहिताः स्म
रंतिममरूपाणिमुच्यंतेह्येनसोऽखिलात् २४ येमांस्तुवंत्यनेनांगप्रतिबुध्यनिशात्यये तेषां
प्राणात्ययेवाहंददामिविमलांरतिं ॥२५॥ श्रीशुकउवाच ॥ इत्यादिश्यहृषीकेशःप्राध्मायजलजो
त्तमं हर्षयन्विबुधानीकमारुरोहखगाधिपं ॥२६॥ इतिश्रीमद्भागवतेमहापुराणेऽष्टमस्कंधेचतुर्थो
ध्यायः ॥४॥ श्रीशुकउवाच ॥ राजन्नुदितमेतत्तेहरेःकर्माघनाशनं गजेंद्रमोक्षणंपुण्यंरैवतंत्वंतरं
शृणु १

त्यष्टमेचतुर्थः ॥४॥ अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते स्वभक्तपक्षपातेनयत्रयोषायितंहरिः पंच
मेपंचमंचाथषष्ठंचाकथयन्मनुं ॥ विप्रशापाद्ध्वनिःश्रीके ॥ कृतांदेवैर्हरिस्तुतिम् १ रामरामरामराम॥

१२

कौंजरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह हरेरर्चनस्यानुभावेनेति १२ अद्भुतं स्वभवनमगात् १३
एतद्गजराजमोक्षणं नाम कर्मसानुभावस्तवेरितः कथंभूतं तत्राह स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीतितथा १४ श्रु

आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं हर्यर्चनानुभावेन यद्गजत्वेप्यनुस्मृतिः १२ एवं विमो
क्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः गंधर्वसिद्धविबुधैरुपगीयमानः कर्माद्भुतं स्व
भवनं गरुडासनोगात् १३ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणं स्वर्ग्यं यशस्यं
कलिकल्मषापहं दुस्वप्ननाशं कुरुवर्य्य शृण्वतां १४ यथानुकीर्तयंत्येतच्छ्रेयस्कामा द्विजातयः शु
चयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये १५ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम शृण्वतां सर्वभूता
नां सर्वभूतमयो विभुः १६ श्रीभगवानुवाच ये मां त्वां च सरश्चेदं गिरिकंदरकाननं वेत्रकीचकवे
णूनां गुल्मानि सुरपादपान् १७ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च क्षीरोदं मे प्रियं धाम श्वे
तद्वीपं च भास्वरं १८ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं
१९

तः श्रेयस्कामा एतद्यथावदनुकीर्तयंति १५ अनेन श्रेयो भवतीति कुतो ज्ञातं साक्षाद्भगवद्वचनादेवेत्याह इद
माहेत्यादि यावत्समाप्ति १६ प्रसंगादन्यस्यापि स्मरणे फलमुच्यते सर्वेषां द्वितीयांतानां स्मरंतीत्यष्टमेनान्वयः

भा ८ ४

भा० ... यतो हेतोः अंबुचरात्मनाकूर्मरूपेण ११ सुराणांसाधितासुधास्त्वुक्तायुद्धायपिसूचितं अतःपृच्छति
भा० अ० किंवान्यदिति ॥१२॥१४॥ नोत्तिष्ठेरन् नपुनर्जीवंतीति स्मेत्यर्थः १५ दुर्वाससाहिकदाचिन्मार्गेगच्छतामिदं
१२ राजोवाच ॥ यथाभगवताब्रह्मन्मथितःक्षीरसागरः यदर्थंवायतश्चाद्रिंदधारांबुचरात्मना
११ यथामृतंसुरैःप्राप्तंकिमन्यदभवत्ततः ॥ एतद्भगवतःकर्मवदस्वपरमो... द्भुतं १२ त्वया
न२ संकथ्यमानेनमहिम्नासात्वतांपतेः ॥ नातितृप्यतिमेचित्तंसुचिरंतापतापितं १३ सूतउवा
च ॥ संपृष्टोभगवानेवंद्वैपायनसुतोद्विजाः ॥ अभिनंद्यहरेर्वीर्यमभ्याचष्टुंप्रचक्रमे १४
श्रीशुकउवाच ॥ यदायुद्धेसुरैर्देवाबाध्यमानाःशितायुधैः गतासवोनिपतितानोत्तिष्ठेरन्स्म
भूयसः १५ यदादुर्वाससःशापेनसेंद्रालोकास्त्रयोनृप निःश्रीकाश्चाभवंस्तत्रनेशुरिज्याद
यःक्रियाः १६ निशम्यैतत्सुरगणामहेंद्रवरुणादयः नाध्यगच्छन्स्वयंमंत्रैर्मंत्रयंतोविनि
श्चयं १७ ततोब्रह्मसभांजग्मुर्मेरोर्मूर्द्धनिसर्वशः सर्वंविज्ञापयांचक्रुःप्रणताःपरमेष्ठिने १८

दृष्ट्वास्वकंठस्थामालांतस्मैदत्ता तेनचश्रीमदेनादत्यैरावतस्यकुंभयोर्निक्षिप्ता सचगजोन्मत्तःपद्भ्यांतां
मालांचूर्णीचकार ततःकुपितोदुर्वासास्तंशशाप त्रिभिर्लोकैःसहनिःश्रीकोभवेति तदेतदाह यदादु

२८ १८ ३८ ...

१३

त्तामसश्चतुर्थोमनुस्तस्यसोदरोभ्राता २ ३ ४ ५ तस्यवैकुंठसंज्ञस्यहरेरनुभावः सनकादिशापेनदैत्य
तांप्राप्ताभ्यांस्वपार्षदाभ्यांवाराहादिरूपेणप्रह्लादिलक्षणः गुणाश्चब्रह्मण्यतादयः परमोदयाश्चमहर्द्धयः

पंचमोरैवतंनाममनुस्तामससोदरः बलिविंध्यादयस्तस्यसुताअर्जुनपूर्वकाः २ विभुरिंद्रः
सुरगणाराजन्भूतरयादयः हिरण्यरोमावेदशिराऊर्ध्वबाह्वादयोद्विजाः ३ पत्नीविकुंठाशुभ्रस्य
वैकुंठैःसुरसत्तमैः तयोःस्वकलयाजज्ञेवैकुंठोभगवान्स्वयं ४ वैकुंठःकल्पितोयेनलोकालो
कनमस्कृतः रमयाप्रार्थ्यमानेनदेव्यातत्प्रियकाम्यया ५ तस्यानुभावःकथितोगुणाश्चप ८५
रमोदयाः भौमान्रेणून्सविममेयोविष्णोर्वर्णयेद्गुणान् ६ षष्ठश्चचक्षुषःपुत्रश्चाक्षुषोनाम
वैमनुः पुरुपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७ इंद्रोमंत्रद्रुमस्तत्रदेवाआप्यादयोग
णाः मुनयस्तत्रवैराजन्हविष्मद्वीरकादयः ८ तत्रापिदेवःसंभूत्यांवैराजस्याभवत्सुतः
अजितोनामभगवानंशेनजगतःपतिः ९ पयोधिंयेननिर्मथ्यसुराणांसाधितासुधा भ्रम
माणोंभसिधृतःकूर्मरूपेणमंदरः १०
कथितास्तृतीयस्कंधादिषु ६ ७ ८ ९ १० रामराम

दैवीभिर्लोके प्रसिद्धाभिर्गीर्भिः स्तुतिमकरोत् २५ देववरं त्वां नमामहे देववरं त्वां च नमामेति वा वरत्वे हेतुः सत्यं कु
तः अविक्रियं तत्कुतः अनंतं आद्यं अनादि आद्यंतवतो हि वृद्ध्यादिविक्रिया भवति किंच गुहाशयं सर्वांत
रं कुतः निष्कलं निरुपाधिं तत्कुतः अप्रतर्क्यं तत्कुतः मनोग्रयानं मनसोपि प्रविष्टं मनः प्राप्य स्थानं ततः
प्रागेव विद्यमानत्वात् तथा च श्रुतिः अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत् तद्धावतो
न्यानत्येति तिष्ठदिति वचसा अनिरुक्तं अविषयत्वात् यद्वाचानभ्युदितं येन वागभ्युदिता इति श्रुतेः

तस्मा अदृष्टस्वरूपाय श्रुतएवीर्यवैविभो ॥ स्तुतिमब्रुवन्दैवीभिर्गीर्भिस्त्ववहितेंद्रियः २५ ब्र॰
ह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यं मनोग्रयानं वचसानिरुक्तं
नमामहे देववरं वरेण्यं २६ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे २७

मनोवचसोरगोचरत्वादतर्क्यं यथेष्टं वा
सर्वेषां हेतुहेतुमद्भावः २६ किंच प्राणादीनां विपश्चितं ज्ञातारं आत्मा अहंकारो विदेहावानत्र छायातिरि
क्तो ज्ञेयमस्तीत्याह अर्थो विषयः इंद्रियाणि तद्ग्राहकाणि तदुभयरूपेणाभासत इति तथात्वं तथापि निद्र
स्वप्नद्रष्टृवद्ज्ञानरहितं कुतः अव्रणं अदेहं अत एव अक्षरं खमिव व्यापिनं च सर्वत्र हेतु यत्र यस्मिन् गृध्रपक्षौ

असुरानयथा देववैलक्षण्येन बलपुष्ट्यादियुक्तान्विलोक्येत्यर्थः १९ हरिं शरणं गतान् संतोषयथा एवं वै सर्वप्राण्य
मरतिष्ठ वैराग्येण फुल्लं विकसितं वदनं यस्य २० मनुष्यादयो जरायुजा अंडजा उद्भिज्जाः स्वेदजाः यस्यावतारः पुरुषस्तस्यांशो
ब्रह्मा तस्य कला मरीच्यादयस्ताभिर्विसर्जिताः पुत्रपौत्रादिद्वारेण जनिताः २१ ननु तर्हि सर्वेषां सो समः स्यात् कि

स विलोक्येंद्रवाय्वादीन्निःसत्वान्विगतप्रभान् लोकानमंगलप्रायानसुरानयथा विभुः १९ समा
हितेन मनसा संस्मरन्पुरुषं परं उवाचोत्फुल्लवदनो देवान्स भगवान्परः २० अहं भवो यूयम
थो सुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं
तमव्ययं २१ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः अथापि सर्गस्थितिसंयमा
र्थं धत्ते रजःसत्वतमांसि काले २२ अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहि
नां तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२३॥ श्रीशुक उवाच ॥ इत्या
भाष्य सुरान्वेधाः सह देवैररिंदम अजितस्य पदं साक्षाज्जगाम तमसः परं ॥२४॥

तच्छरणागत्यैव सत्यं यद्यप्येवं तथाप्यस्मत्पक्षपाती भविष्यतीत्याशयेनाह नयस्येति द्वाभ्यां २२ स्थितिपालन
क्षणः कालः अतः सुरप्रियः सन् स्वीयानां नः शं सुखं करिष्यति २३ यत्र क्षीराब्धौ हरिर्वसति तद्देव तमसः परं स्था

भा० अ० अर्थंनवेदेतियदुक्तंतत्प्रपंचयन्नाह इमेवयंदेवाऋषयश्चयस्यप्रिययातन्वासत्वेनैवसृष्टाअपिवहिरं
१५ तश्च सत्ताप्रकाशाभ्यामाविः प्रकटमपि सूक्ष्मांगतिंनिरुपाधिस्वरूपंनविद्मः इतरप्रधानारजस्तमोमयाः कु
तोवहिस्तंनमामेति पूर्वेणैवान्वयः ३१ इदानींवैराजरूपेणस्तुवन्प्रार्थयते पादौमहीतिद्वादशभिः यत्रमह्यां
जरायुजादिभूतसर्गाः सामहीयस्यपादौसनःप्रसीदतु आत्मतंत्रःपादादिमत्वेपिनपरतंत्रः कुतःब्रह्मअप्रच्यु

इमेवयंयत्प्रिययैवतन्वासत्वेनसृष्टाबहिरंतराविः गतिंनसूक्ष्मामृषयश्चविद्महेकुतोसुराद्याइत
रप्रधानाः ३१ पादौमहीयंस्वकृतैवयस्यचतुर्विधायत्रहिभूतसर्गाः सवैमहापुरुषआत्मतंत्रःप्रसी
दतांब्रह्ममहाविभूतिः ३२ अंभस्तुयद्रेतउदारवीर्यंसिध्यंतिजीवंत्युतवर्द्धमानाः लोकायतो
थाखिललोकपालाःप्रसीदतांब्रह्ममहाविभूतिः ३३ सोमंमनोयस्यसमामनंतिदिवौकसांयोब
लमंधआयुः ईशोनगानांप्रजनःप्रजानांप्रसीदतांनःसमहाविभूतिः ३४

तस्वरूपः ततकुतः महतीविभूतिरैश्वर्यंयस्यसः ३२ उदारंवीर्यंशक्तिर्यस्य तदंभोरेतःसनः
प्रसीदतु उदारवीर्यत्वमाह यतोऽंभसोलोकादयःसिध्यंति जायंते ३३ यःसोमोदेवानामंधः अ
न्नं अतएवबलमायुश्चनगानांवृक्षाणां प्रकर्षेणजनयतिवर्द्धयतीतिप्रजनस्तं यस्यमनःसमामनंतिसप्रसीद १५

तदेवमविक्रियादिभिः सर्वज्ञत्वादिभिश्च सत्यत्वं वरेण्यत्वं चोक्तं संसारचक्राधारत्वेनापि तद्देवं दर्शयन्नाह अज
स्य जीवस्य चक्रं चक्रवदावर्त्तमानं देहादि अजया प्रेर्यमाणं नद्यः अक्षरो यस्य यदधिष्ठानमाहुस्तमहं तं प्रपद्ये कथं
भूतं चक्रं मनोमयं मनःप्रधानं दशेन्द्रियाणि पंच प्राणाश्चेत्येवं पंचदश अरा यस्य आशु शीघ्रं त्रयो गुणाः नाभिर्विक्र
ध्यं यस्य यस्य विद्युदिव चलं अष्टौ प्रकृतयो नेमयः यद्वा वरणानि यस्य २८ सर्वजीवनियंतृत्वादिना च वरिष्ठत्वमा
ह यइति उपसुपर्णे जीवसमीपे तमियं त्वत्वेन आसाचकार आस्ते स्म हासुपर्णा सयुजा सखाया समानं वृक्षं प

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु त्रिणाभिविद्युच्चलमष्टनेमि यदक्षरमाहुस्तमहं
तं प्रपद्ये २८ यएकवर्णं तमसः परं तदलोकमव्यक्तमनंतपारं आसांचकारोपसुपर्णमेनमुपासते योगयु
क्ता न धीराः २८ न यस्य कश्चातितितर्ति मायां याया जनो मुह्यति विदन्नार्थं तं निर्जितात्मात्मगुणं परेशं नमामभ
तेषु संचरंतं ३०

रिषस्वजाते इतिश्रुतेः यद्वा भक्तार्थांगरुडोपरि परिविष्ट इत्यर्थः तर्हि
देहस्थत्वाद्वज्ञानरक्षणादिक्रियावेशात् जीवसाम्यं स्यात्तत्राह एकवर्णं तानेकस्वरूपं तमसः प्रकृतेः परं अलोकं अदृश्यं।
अव्यक्तं निर्विकल्पं अनंतपारं कालतो देशतश्चापरिच्छिन्नं तद्वृत्तैवयः अप्रच्युतस्वरूपत्वान्न जीवसाम्यं तयोरन्यः पि
प्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति विशेषश्रवणादित्यर्थः अत एव धीराः योगेन रथेन प्राप्तिसाधनेनोपासते
भजंते तत्र मामेव स्तुतेरेणान्वयः २९ मायानियंतृत्वेनापि जीवसाम्यं परिहरन् वरिष्ठत्वमाह यस्य मायां कश्च कश्चिदपि

नात्ति तितर्त्ति नातिक्रामति कथंभूतां जनो यया सुद्यति
अर्थमात्मस्वरूपं न तु वेद निर्जितात्मा आत्मशक्ति
मीयाच तद्गुणाश्रयेनंत ३०

भा॰ अ॰ १६

खानि देहगतानि छिद्राणि प्राणः पंचवृत्तिः इंद्रियाणि आत्मा मनश्च असवो नागकूर्मादयः शरीरं चैतेषां
केतं आश्रयभूतं खं पुरुषस्य नाभ्यां प्रजज्ञे सः ३७ यस्य बलान्महेंद्रो जज्ञे छंदांसि ऋषयश्च खेभ्यः कः
प्रजापतिः ३९ ऋतरः श्रधर्मः ४० विट्वेश्यः ऊजः नैपुण्यं तस्य वृत्तिः अंघ्रिः अंघ्रिजा वित्यर्थः अवेदश्शूद्रो अवे

श्रोत्रादिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः प्राणेंद्रियात्मासुशरीरकेतं प्रसीदतां नः
समहाविभूतिः ३८ बलान्महेंद्रस्त्रिदशाः प्रसादान्मन्योर्गिरिशो धिषणाद्विरिंच्यः खेभ्यश्च
छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः समहाविभूतिः ३९ श्रीर्वक्षसः पितरश्छायया सधर्मस्तना
दितरः पृष्ठतोऽन्यत् द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्प्रसीदतां नः समहाविभूतिः ४० विप्रो मु
खं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ऊर्वोर्विड्ओजोंघ्रिरवेदशूद्रो प्रसीदतां मे स महावि
भूतिः ४१ लोभोधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः भ्रुवोर्यमः पक्ष्मभवश्च का
लः प्रसीदतां नः समहाविभूतिः ४२

हः वेश्यतिरिक्ता शुश्रूषा वृत्तिः तद्वृत्तिमान् शूद्रश्च पादांतरे सुगमम् ४१ उपरि उत्तरओष्ठात् न
स्तः नासिकातो द्युतिः कान्तिः पशव्यः पशूनां हितः कामः स्पर्शेनाभवत् ४२ रामरामरामरामरामराम
॥ ऽऽ ॥ रामराम ॥ ऽऽ रामराम ॥ ऽऽ ॥ राममरामरामरामराम ॥ ऽऽ ॥ ऽऽ

१६

अग्निर्यस्य मुखं जातः कथंभूतः जातो वेदो धनं यस्मात् क्रियाकांडं तत्रनिपाद्यं कर्म तन्निमित्तं जन्म यस्य अंतःसमुद्रे
उदरमध्ये स्वधातून् पाकार्हीभैव अन्नादीननुपचन् प्रसिद्धसमुद्रेपि वडवानलरूपेण उदकानीवेनुपचन्नग्निः
३५ एष तत्तरणिर्यस्य चक्षुरासीत् कथंभूतः देवयान अर्चिरादिमार्गो देवता त्रयीमयः सैषा त्रय्येव विद्या तपती
तिश्रुतेः ब्रह्मणो धिष्ण्यं उपासनास्थानं य एषोंतरादित्ये हिरण्मयः पुरुष इतिश्रुतेः मुक्तेर्द्वारं देवयानत्वा

अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा अंतःसमुद्रेनुपचन्स्वधातून्प्र
सीदतां नः स महाविभूतिः ३५ यश्चक्षुरासीत्तरणिर्देवयानस्त्रयीमयो ब्रह्मण एष धिष्ण्यं
द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ३६ प्राणाद्भवद्यस्य चराचराणां प्राणः स
हो बलमोजश्च वायुः अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ३७

त् अमृतं च पुण्यलोकत्वात् मृत्युश्च कालात्मकत्वात् एवंभूतस्तरणिर्यस्य चक्षुः ३६ स एवंभू
तो वायुश्चराचराणां सह आदिधर्मवान् प्राणाः पंच प्राणा वयं कुड्याद्यधिष्ठातारो देवाः सम्राजं
भृत्या इव अन्वास्म अनुगत्य स्थिताः एवंभूतो वायुर्यस्य प्राणाद्भूतः सः ३७ ॥ ६६ ॥ ६६

भा० अ०
१७

तत्रवैफल्यमुपपादयति अल्पोपिकर्मकल्पः कर्माभासोपि ईश्वरार्पितश्चेत् फलाय न कल्पते हि यस्मात्तस्य पुरुषस्यात्माअत एव दयितो हितश्च नह्यात्मा मे दयितेहिते चार्पितं निःफलं स्यात् ४८ तदनन्तफलत्वमाह यथा हिमूलावसेचनं स्कंधानां शाखानां च भवति ४९ एवं सत्यपित्वदर्पितकर्मणां त्वज्ज्ञानामस्माकं यन्निमित्त

नावमः कर्मकल्पोपिविफलायेश्वरार्पितः कल्पतेपुरुषस्यैवसह्यात्मादयितोहितः ४८ यथा
हिस्कंधशाखानांतरोर्मूलावसेचनं एवमाराधनंविष्णोः सर्वेषामात्मनश्चहि ॥४९॥ नमस्तुभ्य
मनंतायदुर्वितर्क्यात्मकर्मणे निर्गुणायगुणेशायसत्वस्थायचसांप्रतं ॥५०॥ इतिश्रीमद्भागवतेम
हापुराणेअष्टमस्कंधेपंचमोध्यायः ॥५॥ श्रीशुकउवाच ॥ एवंस्तुतःसुरगणैर्भगवानहरिरीश्वरः
तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः १ तेनैवसहसासर्वेदेवाःप्रतिहतेक्षणाः नापश्यन
खंदिशःक्षौणीमात्मानंचकुतोविभुं ॥२ विरिंच्योभगवान्दृष्ट्वासहसर्वेणतांतनुं स्वच्छांमरक
तश्यामांकंजगर्भारुणेक्षणां ३

मिदंदुःखनिमित्तमितित्वमेववेत्सीत्याशयेनाह नमइति दुर्वितर्क्याण्यात्मकर्माणिस्वभावचेष्टितानियस्यत
स्मै ५० ॥ अष्टमे पंचमः ॥५॥ षष्ठेपुनःस्तुतिविस्माविर्भूतेसुरैःकृता तन्मंत्राश्चासुरैःसाकममृतार्थेमहोद्यमः १
सहस्राकोदयद्युतिरिवद्युतिर्यस्य १ महसातेजसाप्रतिहतानीक्षणानिचक्षूंषियेषां २ तामाविर्भूतांतनुंविरिं

कौ भा टी अ ८ अ ५ ॥ ४ ॥
१७

द्रव्यंभूतानिवयःकालंविशेषंस्लौकिकप्रपंचं यद्यस्माद्दुर्विभाव्यं कुतःप्रबुधापबाधं विद्वद्भिरपोह्यमानं पाठांतरे प्रबु
धानांमायेत्यवबोधोयस्मिन्नित्यर्थः ४३ तदेवप्रपंचमुपवर्णयति प्रपंचमुपवर्णयन्प्रणमति वृत्तिभिर्देहे
नादिभिः नभस्वान्वायुः तस्येवऊतिर्लीलायस्यतस्मै ४४ तेसस्मितंमुखांबुजंदिदृक्षूणामस्माकंचक्षुरादिक

द्रव्यंवयःकर्मगुणान्विशेषंयद्योगमायाविहितान्वदंति यद्दुर्विभाव्यंप्रबुधापबाधंप्रसीदतांनः
समहाविभूतिः ४३ नमोस्तुतस्माउपशांतशक्तयेस्वाराज्यलाभप्रतिपूरितात्मने गुणेषुमाया
रचितेषुवृत्तिभिर्नसज्जमानायनभस्वदूतये ४४ सत्वंनोदर्शयात्मानमस्मत्करणगोचरं प्रप
न्नानांदिदृक्षूणांसस्मितंतेमुखांबुजं ४५ तैस्तैःस्वेच्छाभूतैरूपैःकालेकालेस्वयंविभो कर्मदु
र्विषहंयन्नोभ वांस्तत्करोतिहि ४६ क्लेशभूर्य्यल्पसाराणिकर्म्माणिविफलानिच दे
त्र २ हिनांविषयार्त्तानांनतथैवार्पितंत्वयि ४७

रणगोचरंयथाभवंचात्मानंदर्शय ४५ भक्तेच्छानुवर्तित्वंचतवबहुशोदृष्टमेवेत्याह तैरिति यन्नो
दुर्विषहमशक्यंतद्भगवान्स्वयमेवकरोति ४६ नचवहिर्मुखानामिवत्वद्भक्तानामस्माकंत्वय्यर्पि
तानिपुण्यानिविपरीतफलानिभवितुमर्हंतीत्याह क्लेशभूरियेषु अल्पंसारंफलंयेषु यद्वा विफला
न्येवसकामानांकर्म्माणित्वय्यर्पितंतुनैवतथा ४७

भा·अ· तन्मूर्तेः सनातनत्वमपरिमेयत्वं चोपपादयति रूपमिति हेपुरुषर्षभ हेधातः एतत्तवरूपं वैदिकेनतांत्रिके

१८ णचयोगेनउपायेन श्रेयोर्थिभिः सदाइज्यं अतोनेदानीमहर्वंजातमितिभावः ननुस्वयंदेवाः पूज्यत्वेनप्र

सिद्धाः सत्यं सर्वेप्यत्रैवांतर्भूताइत्याह उअहोहसफुटं अमुष्मिंस्त्वयिनोस्मांस्त्रिलोकांश्चसहपश्यामितत्र

हेतुः विश्वमूर्तौयस्य अतस्तवैतद्रूपं परिछिन्नमपिनभवतीत्यर्थः ९ विश्वमूर्त्तित्वमेवाह त्वयीति घटस्य

रूपंतवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण योगेनधातःसहनस्त्रिलोकान्पश्याम्यमुष्मिन्नु

हविश्वमूर्त्तौ ९ त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यंतआसीदिदमात्मतंत्रे त्वमादिरंतोजगतो

स्यमध्यं घटस्येवमृत्स्नेवपरःपरस्मात् १० त्वंमाययात्माश्रययास्वयेदंनिमायविश्वंतदनुप्रविष्टः प

श्यंतियुक्तामनसामनीषिणोगुणव्यवायेप्यगुणंविपश्चितः ११ यथाग्निमेधस्यमृतंचगोषुभु

व्यन्नमंबूद्यमनेचवृत्तिं योगैर्मनुष्याअधियंतिहित्वंगुणेषुबुद्ध्याकवयोवदंति १२

मृत्तिकायथाआदिरंतश्च मध्यंच तथात्वमस्यजगतः तत्रहेतुः परस्मात्प्रधानादपिपरः १० मृत्तिकादृष्टांतेनप

रिणामप्राप्तंवारयतित्वमिति स्वयास्वाधीनया अतएवगुणानांव्यवायेपरिणामेप्यगुणःमेवत्वांयुक्ताःपश्यं

ति मनीषिणोविवेकिनोविपश्चितःशास्त्रज्ञाः ११ एतदेवसदृष्टांतमाह यथाग्निःकाष्टेमथनेन अमृतमाज्यं गो

श्रीराधि ४ षुदोहनादिना भुविअन्नंकर्षणादिना अंबुचखननउद्यमेषुपुरुषकारेवाणिज्यादिनावृत्तिंजीविकांच यद्वा अं

बुचउद्यमनेघटीयंत्रादिनोद्धरणेयोगैरुपायैर्मनुष्याअधीयंति प्राप्नुवंति तथाकवयस्त्वांबुद्ध्यागुणेष्वधीयं १८

तप्तहेमवद्द्वदातेनपीतेनलसताकौशेयवाससायुक्तौ प्रसन्नानिचारूणिसर्वाण्यंगानियस्याः सोभनंमुखंयस्याः
सुंदरेभ्रुवौयस्याः ४ महान्तोमणयोयस्मिंस्तेनकिरीटेनकर्णाभरणेकुंडले ताभ्यांनिर्भातौकपोलौताभ्यांश्रीमु
खांबुजेययस्याः ५ कौस्तुभआभरणंकंठेयस्याः लक्ष्मीवक्षसिबिभ्रतीं ६ देवप्रवरोब्रह्मासर्वाणिगौरवनीगतैःसा

तप्तहेमावदातेनलसत्कौशेयवाससा प्रसन्नचारुसर्वांगींसुमुखींसुंदरभ्रुवं ४ महामणिकिरी
टेनकेयूराभ्यांचभूषितां कर्णाभरणनिर्भातकपोलश्रीमुखांबुजां ५ कांचीकलापवलयहारनू
पुरशोभितां कौस्तुभाभरणांलक्ष्मींबिभ्रतींवनमालिनीं ६ सुदर्शनादिभिःस्वास्त्रैर्मूर्तिमद्भिरु
पासितां तुष्टावदेवप्रवरःसशर्वःपुरुषंपरं सर्वामरगणैःसाकंसर्वांगैरवनीगतैः ७॥ श्रीब्रह्मोवा
च॥ अजातजन्मस्थितिसंयमायागुणायनिर्वाणसुखार्णवाय अणोरणिम्नेपरिगण्यधाम्नेम
हानुभावायनमोनमस्ते ८

सांगप्रणतैः अनाविराविरासे येनाभूत्ताभूदितिब्रुवन् ब्रह्माभिप्रेति नित्यत्वंविस्तवतनोः ७ श्रीमत्तेरयमा
विर्भावएवनत्वस्मदादिवत्वास्तीत्याह नजातोजन्मादयोयस्यकुतः अगुणाय अतोनिर्वाणसुखस्यार्ण
वायेत्यर्थः तथापिअणोरपिअणिम्ने अतिसूक्ष्माय दुर्ज्ञानत्वात् वस्तुतस्तुपरिगणयइयत्तातीतंधामस्व
र्तिर्यस्यतस्मै नचैतदसंभावितं यतः महाननचिंत्योऽनुभावोयस्य ८ ॥ राम

भा० अ०
१९

ईश्वरस्यापि तथैवाभिप्रेतमित्याह एक एवेश्वरः समर्थोपि १७ हे सुराः देवा अन्ये च गंधर्वादयः १८ वृ आत्मनः याव
द्वयोर्वृद्धिर्भवति १९ अर्थस्य प्रयोजनस्य पदवीं सिद्धिं प्राप्तैस्ततः पश्चाद् अहिमूषिकवद्बध्यघातेन वर्त्तितव्यमिति शेषः

एक एवेश्वरस्तस्मिन्सुरकार्य्ये सुरेश्वरः विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः १७ श्री
भगवानुवाच ॥ हंत ब्रह्मन्नहो शंभो हे देवा मम भाषितं शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा
सुराः १८ यात दानवदैतेयैस्तावत्संधिर्विधीयतां ॥ कालेनानुगृहीतैस्तैर्यावद्वो भव आत्म
नः १९ अरयोपि हि संधेयाः सति कार्य्यार्थगौरवे अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः
२० अमृतोत्पादने यत्नः क्रियतामविलंबितं यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोऽमरो भवेत्
२१ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं
सहायेन मया देवा निर्मंथध्वमतंद्रिताः २२ क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः २३ (ति २

यद्वा पेटिकायां निरुद्धो हिर्यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेन संधिं विधत्ते पश्चात्तमेव कदाचिद्भक्षय
ति तथार्थमार्गप्रवृत्तैः प्रथमं संधेया इत्यर्थः २० ततः तैः सह यत्कार्यं तदाह अमृतोत्पादन इत्यस्यामृतस्य
पीतस्य सतः २१ नेत्रं रज्जुं २२ ननु तर्हि तेप्यमृतपानेनामृताः स्युस्तत्राह क्लेशभाज इति २३ १९

हेनाथसरोजनाभअतिचिरादीप्सितमर्थंतंयोगेकप्राप्यंत्वांसमुज्जिहानं आविर्भवंतंप्रत्यक्षंततो दृष्ट्वा द्य
वयवनिर्वृत्तिंगताः दवार्त्ताः दावाग्निपीडिताः १३ यद्विधेयं तत्कथयतेतिचेत्तत्राह हेअंतरात्मन् अशेष
साक्षिणस्तेवहिः किंनान्यैर्ज्ञाप्यमस्ति १४ यूयमेववाकिंचित्कुरुतेतिचेत्तत्राह अग्नेःकेतवोविस्फुलिंगाइवते

तंत्वांवयंनाथसमुज्जिहानंसरोजनाभातिचिरेप्सितार्थं दृष्ट्वागतानिर्वृतिमद्यसर्वेगजाइ
वार्त्ताइवगांगमंभः १३ सत्वंविधत्स्वाखिललोकपालावयंयदर्थास्तवपादमूलं समागतास्ते
वहिरंतरात्मन्किंचान्यविज्ञाप्यमशेषसाक्षिणः १४ अहंगिरित्रश्चसुरादयोयेदक्षादयोग्नेरि
वकेतवस्ते किंवाविदामेशपृथग्विभाताविधत्स्वशंनोद्विजदेवमंत्रं १५ श्रीशुकउवाच एवंवि
रिंच्यादिभिरीडितस्तद्विज्ञायतेषांहृदयंतथैव जगादजीमूतगभीरयागिरावद्धांजलीन्संवृतस
र्वकारकान् १६

स्वतः वयंपृथग्विभाताःसंतः आत्मनःशंश्रियः किंवाविद्मः अतस्त्वमेवद्विजानांमंत्रंविधत्स्व इदं
कुरुतेत्युभयमुपदिशेत्यर्थः १५ हृदयमंत्रउपदेशव्यइत्यभिप्रेतम् यथायथैव विज्ञायजगा
द संवृतानिनियमितानिसर्वाणिकारकाणि इंद्रियाणियैः १६ ॥ ६३ ॥

भा० अ० संविदं समयं ३२ परिघा इव बाहवो येषां ३३ ३४ ३५ ३६ ३७ ३८ विसर्जितः प्रस्थापितः सुपर्णेन त्रा

२०

ततो देवासुराः कृत्वा संविदं कृतसौहृदाः उद्यमं परमं चक्रुरमृतार्थे परंतपः ३२ ततस्ते मंदरगिरि
मोजसोत्पाट्य दुर्मदाः नदंत उदधिं निन्युः शक्ताः परियवाहवः ३३ दूरभारोद्वहः श्रांताः शक्रवै
रोचनादयः अपारयंतस्तं वोढुं विवशा विजहुः पथि ३४ निपतन्स गिरिस्तत्र बहूनमरदानवान्
चूर्णयामास महता भारेण कनकाचलः ३५ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् वि
ज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ३६ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ईक्ष
याजीवयामास निर्जरान्निर्व्रणान्यथा ३७ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया आरुह्य प्र
ययावब्धिं सुरासुरगणैर्वृतः ३८ अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ययौ जलांत उत्सृ
ज्य हरिणा स विसर्जितः ३९ ॥ इति श्रीमद्भागवते महापुराणे ऽष्टमस्कंधे मंदराचलानयने षष्ठो
ध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिं परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्वि
ताः १

यित्ति वासुकेरागमनो योग्यादिति भावः ॥ ३९ ॥ इत्यष्टमे षष्ठः ॥ ६ ॥ सप्तमे प्रथमोद्भूतविषमित्यखिलैर्जनैः
स्तुतः स न रूपया रुद्रः पपौ विषमितीर्यते फलभागेन त्वाप्यमृतो भागो भविष्यतीति संमंत्र्य वासुकिं नेत्रं परि

८

२०

वलिभिः सहकारिभिः साध्याश्चार्थास्तदनुशरणं विना न सिध्यंतीति कृत्वा सामादिकमुपदिशति यूयमिति द्वाभ्यां
हे सुराः संरंभेण संभ्रमेण सांत्वय्य साममार्गेणैव सिध्यंति २४ वस्तुषु मथनादुत्पन्नेषु २५ २६ सुरास्तु बलिमुपय

यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः न संरंभेण सिध्यंति सर्वेर्थाः सांत्वया यथा २४ न भेतव्यं
कालकूटाद्विषाज्जलधिसंभवात् लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु २५ श्रीशुक उवाच
इति देवान्समादिश्य भगवान्पुरुषोत्तमः तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः २६ अथ तस्मै
भगवते नमस्कृत्य पितामहः भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः २७ दृष्ट्वारीनप्यसं
यत्तान्जातक्षोभान्स्वनायकान् न्यषेधद्दैत्यराट् श्लोकः संधिविग्रहकालवित् २८ ते वैरोच
निमासीनं गुप्तं चासुरयूथपैः श्रिया परमया जुष्टं जिताशेषमुपागमन् २९ महेंद्रः श्लक्ष्ण
या वाचा सांत्वयित्वा महामतिः अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ३० तदरोचत दै
त्यस्य तत्रान्ये ये सुराधिपाः शंबरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ३१

युः उपजग्मुः २७ असंयत्तानपि दृष्ट्वा श्लोकः कीर्त्तिर्हः २८ वैरोचनिं बलिं जितमशेषं त्रैलोक्यं येन तं २९
तत्सर्वममृतोन्मथनादिः ३० तत्र ये अन्ये वा सुराधिपाः पौलमकालेयादयः शंबरादयश्च तेभ्यश्चारोचयत् ३१

भा०अ० तस्यगिरेरावर्त्तनंभ्रमणं अंगकंडूयनंमेने १० आसुरेणआसुराकारेणाविशत् ११ १२ आत्मनिदेवदैत्य
२१ मध्येगोत्रेदीर्घरूपेणनेत्रेअभेद्यावोधरूपेणपरेणहरिणाक्षोभितंनक्राणांचक्रंसमूहोयस्मिन् १३ दृशश्चमु

सुरासुरेंद्रैर्भुजवीर्य्यवेपितंपरिभ्रमंतंगिरिमंगपृष्टतः विभ्रत्तदावर्त्तनमादिकच्छपोमेनेंऽगकं
डूयनमप्रमेयः १० तथासुरानाविशदासुरेणरूपेणतेषांवलवीर्य्यमीरयन् उद्दीपयंदेवगणांश्च
विष्णुर्दैवेननागेंद्रमवोधरूपः ११ उपर्य्यगेंद्रंगिरिराडिवान्यआक्रम्यहस्तेनसहस्रवाहुः त
स्थौदिविब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिःसुमनोभिवृष्टः १२ उपर्य्यधस्तात्मनिगोत्रनेत्रयोः
परेणतेप्राविशतासमेधिताः ममंथुरब्धिंतरसामदोत्कटामहाद्रिणाक्षोभितनक्रचक्रं
१३ अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोसुराः पौलोमकालेयवलील्व
लादयोदवाग्निदग्धाःसरलाइवाभवन् १४

खानिच श्वासाश्च अहींद्रस्यसाहस्रम् अपरिमिताः येकठोराः दृगादयस्तेभ्योनिर्गताभ्यामग्निधू
माभ्यामाहतोवर्चोयेषांते सरलाः द्रुमविशेषाः १४ ॥ ऽऽ ॥ रामराम ॥ ऽऽ ॥ ऽऽ २१

वासुकेर्मुखं तीव्रं दैत्यानग्राहयितुमेव पूर्वं हरिः पुरस्तात् मुखं जगृहे ततोऽभवन् मुखं जगृहुः २ ३ ४ कृतोधारणेम
स्थान विभागो यैः ५ ६ दैवेन हेतुना स्वपौरुषे सति ७ विघ्नेशस्य विधिं तेन रचितं विघ्नं अवितथः सत्योभिसंधिः

आरेभिरेसुरायत्ताअमृतार्थेकुरूद्वह हरिःपुरस्ताज्जगृहेपूर्वंदेवास्ततोऽभवन् २ तन्नैच्छन्दैत्यपतयो
महापुरुषचेष्टितं नगृह्णीमोवयंपुच्छमहेरंगममंगलं स्वाध्यायश्रुतसंपन्नाःप्रख्याताजन्मकर्मभिः ३
इतितूष्णींस्थितान्दैत्यान्विलोक्यपुरुषोत्तमः स्मयमानोविसृज्याग्रंपुच्छंजग्राहसामरः ४ कृतस्था
नविभागास्तएवंकश्यपनंदनाः ममंथुःपरमायत्ताअमृतार्थंपयोनिधिं ५ मथ्यमानेर्णवेसोद्रि
रनाधारोह्यपोविशत् ध्रियमाणोपिबलिभिर्गौरवात्पांडुनंदन ६ तेसुनिर्विण्णमनसःपरिम्लान
मुखश्रियः आसन्स्वपौरुषेनष्टेदैवेनातिबलीयसा ७ विलोक्यविघ्नेशविधिंतदेश्वरोदुरंतवीर्योवि
भि २ तथाभिसंधिः कृत्वावपुःकच्छपमद्भुतंमहत्प्रविश्यतोयंगिरिमुज्जहार ८ तमुत्थितंवीक्ष्यकुला
चलंपुनःसमुत्थितानिर्मथितुंसुरासुराः दधारपृष्ठेनसलक्षयोजनप्रस्तारिणाद्वीपइवापरम
हेर ९
संकल्पोयस्य ८ लक्षयोजनप्रस्तारोऽस्यास्तीति तथा तेन पृष्ठेन ९ रामरामरामरामरामरामरामराम

दिशि दिशीति यद्वा उग्रो वेगो रोमांचस्वेदादयो यस्मात् अत एवासह्यं विलोक्य
भा० अ० कुर्वः उग्रो वेगो यस्य तद्देवाह
२२ भीताः अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः १९ त्रिलोक्या भवाय देव्या सह अद्रौ कैला

तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यवीर्यं भीताः प्रजाः दुद्रुवुरंग सेश्वरा अरक्ष्य
माणाः शरणं सदाशिवं १९ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनां आसीन
मद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः २० प्रजापतय ऊचुः देवदेव महादेव भूतात्म
न्भूतभावन त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् २१ त्वमेकः सर्वजगत ईश्वरो बंध
मोक्षयोः तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुं २२ गुणमय्या स्वशक्त्यास्य सर्गस्थित्य
प्ययान् विभो धत्से यदा स्वदृग्भूमन् ब्रह्मविष्णुशिवाभिधां २३

से आसीनं तथापि मुनीनामभिमतं तेषामपवर्गाय तपो जुषाणं २० निर्गुणं सगुणं चैव शिवं हरिरपि
सत्कर्मैः स्तुवंतस्त्वप्रजेशानामन्यं तान्नुत्तरं तयोः २१ २२ नन्वेवंभूतो विष्णुरिति प्रसिद्धं तत्राहुः गुणम
य्येति अस्य जगतो यदा सर्गादीन् धत्से तदा हे भूमन् स्वदृक् स्वतः सिद्धज्ञानः त्वं ब्रह्मादिसंज्ञां धत्से २३ २२

देवांस्तु भगवद्वशा घनाः समभ्यवर्षन् समुद्रोर्मिभिरुपगूढा वायवश्च शीतला ववुः वांति स्म कथंभूतानंत
स्याहींद्रस्य श्वासशिखाग्निभिर्हता प्रभा येषां धूम्राण्यंबराणि येषां १५ धृतोऽद्रिर्येन धृताद्रिः भगवान्
परमपुरुषोऽनंतरमशोभतेत्यन्वयः कथंभूतः कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमाना विद्युत्कुं

देवांश्च तच्छ्वासशिखाहतप्रभान् धूम्रांबरस्रग्वरकंचुकाननान् समभ्यवर्षन्भगवद्वशाघ
नाववुः समुद्रोर्म्युपगूढवायवः १५ मथ्यमानात्तथा सिंधोर्देवासुरवरूथपैः यदा सुधा
न जायेत निर्ममंथाजितः स्वयं १६ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राज
द्विलुलितकचः स्रग्धरो रक्तनेत्रः जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्र
तिगिरिरिवाशोभताथो धृताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालाहलाह्वयं
प्रति संभ्रांतमीनोमकरादिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् १८

उल्लसत्कर्णायस्य स तथा मूर्ध्नि विभ्राजंतो विलुलिताः कचा यस्य स तथा जैत्रैर्जिष्णुभिर्दंदशूकं सर्पं प्रति
गिरिः प्रतिद्वंद्वी पर्वतः १७ हालाहलाह्वमित्याह्वा नाम यस्य संभ्रांता मीना उन्नता मकरादयश्च यस्मि
न् तिम्यादिभिराकुलाद्वेतद्विषम प्रतिच्छप्रतिमं प्रतिक्रियाशून्यमिति वा १८ ॥ ॥ ॥

भा० श्र० पंचोपनिषदस्तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्रा ये मुखैरष्टोत्तरमंत्राणां यदष्टेदेनाष्टोत्तरत्रिंशत्कलात्मका मंत्रा इत्यर्थः अवस्थितिः उपरताऽवस्था २९ अधर्मस्योभिषुदंभलोभादिषु ये रूर्मिभिर्विसर्गः संहारः
२३ यद्वा यैः सत्वादिभिर्विविधः सर्गः तानि नेत्रत्रयं हे देव छंदोमयः ऋषिर्वेदः स त्वेत्ताईक्षणं साक्षान्मनुरिति पाठे मनुर्वेदः ३० तमेवाह हे गिरिश तेपरं ज्योतिरखिलानां लोकपालादीनां गम्यं न भवति कुतः यत्र रज

मुखानि पंचोपनिषदस्तव ईशाष्टोत्तरं त्रिंशन्मंत्रवर्गः यततच्छिवाख्यं परमार्थतत्त्वं देव स्वयं
ज्योतिरवस्थितिस्ते २९ छायात्वथ मोभिषु यै विसर्गो नेत्रत्रयं सत्वरजस्तमांसि साक्षान्मनुःश्रुत्वा
कृतस्तवेत्ता छंदोमयो देव ऋषिः पुराणः ३० न ते गिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यं ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं ३१ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतस्तुतये न तत्ते यस्त्वंतकालमिदमात्मकृतं स्वनेत्रवह्निस्फुलिंग
शिखया भसितं न वेद ३२

श्चादि नास्ति किंतु ज्योतिः यन्निरस्तभेदं ब्रह्म ३१ कामश्च अध्वरश्च दक्षयज्ञः त्रिपुराद्यश्च ये अनेकभूत
तरु द्रुहस्तान् क्षपयतः संहरतस्ते न तत्कर्म स्तुतये न भवति अत्यल्पमेवेदमित्यर्थः गरभक्षणस्यापि अवश्यभावित्वेन सिद्धवन्निर्देशः स्तुतये अलं न भवतीत्यत्र हेतुः यस्तु भगवान् स्वनेत्रवह्निविस्फुलिंगस्य शिखया

[illegible] ९ १

तत्र हेतुः त्वं ब्रह्मेति सदसतो भावान् देवतिर्यगादिरूपान् भावयतीति तथा रज्ज्वां तु त्वद्व्यतिरिक्तं नास्तीत्या
हुः आत्मैव त्वं नानाशक्तिभिर्जनयद्रूपेणाभातः यस्मादीश्वरः २४ स्वतःसिद्धज्ञानत्वमुपपादयंतः जगदात्मना
आभासप्रकारमाहुः त्वं शब्दस्य वेदस्य योनिः अतः स्वतःसिद्धज्ञानः त्वं जगदादिर्महत्तत्त्वं आत्मा च अहंका
रः कथंभूतः प्राणेंद्रियद्रव्याणां कारणभूता गुणा यस्य रजसादि त्रिविधः इत्यर्थः स्वभावादयश्च त्वमेवेत्ये

त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः २४ त्वं शब्दयोनिर्जे
गदादिरात्मा प्राणेंद्रियद्रव्यगुणः स्वभावः कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनंति २५ ल ३
अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं कालं गतिं तेऽखिलदेवतात्मनो दिशश्च
कर्णौ रसनं जलेशं २६ नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः परावरात्माश्रय
णं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते २७ कुक्षिः समुद्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते
छंदांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन् हृदयं सर्वधर्मः २८

तुः संकल्पः सत्यमृतं चेति यो धर्मः स त्वं महदादिरूपत्वे महदादिरूपत्वे हेतुः त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधा
नं त्वयि तदाश्रयं तदामनंति यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकत्वमाहुः २५ अखिलदेवतात्मा
अग्निः सर्वा देवता इति श्रुतेः सोऽग्निस्ते मुखं हे लोकभव क्षितीयां ते पु विदुरित्यस्य संबंधः २६ परे च वरे च य आत्म
नो जीवास्तेषामाश्रयस्तवात्माहंकारः २७ त्रयीमयात्मन् यज्ञत्रयमूर्ते २८ ॥

भा॰श्री॰
२४

मत्प्रभावमविचार्य्य विषपाने प्रवृत्तं मां कथंचिदियं प्रिया वारयेदिति शंकया तामनुज्ञापयन्नाह
अहोवतेति सार्द्धैश्चतुर्भिः वैशसं दुःखं ३७ प्राणेप्सूनां प्राणरक्षेच्छूनां मे मया प्रभोः समर्थस्यार्थः

श्रीशुक उवाच ॥ अहो वत भवान्येतत्प्रजानां पश्य वैशसं क्षीरोदमथनोद्भूतात्कालकूटादुप
स्थितं ३७ आसां प्राणपरीप्सूनां विधेयमभयं हि मे एतावान्हि प्रभोरर्थो यद्दीनपरिपा
लनं ३८ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः वद्धवैरेषु भूतेषु मोहितेष्वात्ममा
यया ३९ पुंसः कृपयतो भद्रे सर्वात्मा प्रियते हरिः प्रीते हरौ भगवति प्रीयेहं सचराच
रः ४० तस्मादिदं गरं भुंज्ये प्रजानां स्वस्तिरस्तु मे एवमामंत्र्य भगवान्भवानीं विश्वभाव
नः तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ४१ ततः करतलीकृत्य व्यापि हालाहलं वि
षं अभक्षयन्महादेवः कृपया भूतभावनः ४२ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः
यच्चकार गले नीलं तच्च साधोर्विभूषणं ४३

कार्य्यः ३८ किंच वद्धवैरेषु भूतेषु परस्परं जिघांसत्सु ३९ कृपयतः कृपां कुर्वतः पुंसः ४० मे मत्तः स्व
स्ति शोभनासत्ता सुखेन जीवितमस्त्वित्यर्थः जग्धुं अत्तुं ४१ करतलीकृत्य करतलीपरिमितमात्रके

त्वा ४२ जलकल्मषः जलदोषो विषं यस्मात्तत्
गले नीलं चकार साधोः कृपालोः ४३

तदेव नित्यं परानुग्रहव्यग्रं त्वां ये निंदंति ते ऽति मूर्खा इत्याहुः ये तु उमया सह चरंतं तस्यां नितरां रतं कामिनं कल्पयंते
प्रलपंति तथा स्मशाने चरंतम् उग्रं क्रूरं परुषं च हिंस्रकं कथ्यंते कथं न ते आत्मारामम् आप्तगुरवो विप्र हितोपदेष्टारस्तै
र्हृदि चिंतितम् अंघ्रिद्वंद्वं यस्य तथाभूतम् अपि तेतमसाभितप्तम् अपि ते न नेतव ऊतिम् अविदन्निति काकुः त्वल्लीलां नैव वि
दुरित्यर्थः अतो हातलज्जास्त्यक्तत्रपाः कथमात्मारामैः सेवितचरणयुगलस्य कामित्वसंभवः कथं वा तपसा

ये त्वात्मारामम् अगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतम् उमया तपसाभितप्तं कत्थंत उग्रपरुषं निरतं स्मशा
ने ते नूनम् ऊतिम् अविदंस्तव हातलज्जाः ३३ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति
भूम्नः ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रं ॥ ३४ ॥ एतत्परं प्रपश्यामो
न परं ते महेश्वर मृडनाय हि लोकस्य व्यक्तिस्ते व्यक्तकर्मणः ३५ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं
तासां कृपया भृशपीडितः सर्वभूतसुहृद्देव इदमाह सतीं प्रियां ३६

भितप्तस्य व्यग्रत्वे परुषत्वं वा संभ
ती वेति अविचार्यैव प्रलापादित्यर्थः ३३ आस्तां तावन्निंदकानां वार्त्ता महांतोपि तव तत्त्वं न जानंतीत्याहुः तत्र स्मा
त्स्वस्वरूपस्य गमने ज्ञाने ब्रह्मादयोपि न समर्थाः स्तवने तु कुतः शक्ताः स्युः तत्र वयं क प्रभवामः यतस्तेषां सर्गे त्र
न्यंता अर्वाचीनास्तथापि यदेतास्तवनं एतदात्मशक्तिपरिमितमात्रमित्यर्थः ३४ तदेवाहुः एतदेवाहुः एत

भा० अ०
२५

५ भगवतोयः श्वेताद्रिः कैलाशपर्वतस्य महिमानं दंतैः शिखरतुल्यैर्हरन्नयश्चंद्रवत्यां गुरुरित्यनुषंगः ६ वल्गु
भिर्गत्यादिभिः स्वर्गिणां रमण्यः रतिकार्यः ७ सुदामानाम पर्वतः तत्रैकस्यां दिशि जाता सौदामिनी स्फटि
कादिमयगिरिसिंगोद्वधिकं विस्फुरंति विद्युदिव कांत्या दिशो रंजयंती श्रीः स एव साक्षान्मूर्त्तिधारिणी सती सेव

कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः तस्मिन्मणौ स्पृहां चक्रे वक्षोऽलंकरणे हरिः ५ ततोऽभ
वत्पारिजातः सुरलोकविभूषणं पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ६ ततश्चाप्सरसो जाता
निष्ककंठ्यः सुवाससः रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ७ ततश्चाविरभूत्साक्षाच्छ्री
रमा भगवत्परा रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा ८ तस्यां चक्रुः स्पृहां सर्वे ससुरा ८
सुरमानवाः रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ९ तस्या आसनमानिन्ये महेंद्रो
महदद्भुतम् मूर्त्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि १०

भगवत्परा रमा आविरभूदित्यर्थः ८ तस्या रूपादिमहिम्ना आक्षिप्तानि चेतांसि येषाम् ९ भगवद्वक्षसि स्थि
तस्याविलोकितानां देवानां यथापूर्वं सपत्न्याप्तिमस्तरणं च तद्विपर्ययं वक्तुं अभिषेकादिमहो
त्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकारमाह तस्या आसनमित्यादि अथासीद्वारुणीत्यं
२५

४४ ४५ प्रस्कन्नं गलितं अपरे ये सविषास्ते पि जगृहुः अनेन विषस्यातीव्रतोक्ता ४६ ॥इति श्री अष्टमे सप्तमः॥७॥
अष्टमे मथ्यमानेब्धौ लक्ष्म्याविष्णोर्वृते सुरैः धन्वंतरेर्हृते सोमे मोहिन्युद्भव वर्ण्यते १ हविर्धानी सुरभिः॥१॥

तप्यंते लोकतापेन साधवः प्रायशो जनाः परमाराधनं तद्धि पुरुषस्याखिलात्मनः ४४ निशम्य
कर्म तच्छंभोर्देवदेवस्य मीढुषः प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ॥४५॥ प्रस्कन्नं पिबतः
पाणेर्यत्किंचिज्जगृहुः स्म तत् वृश्चिकाहिविषौषध्यो दंदशूकाश्च ये परे ॥४६॥ इति श्रीमद्भागवते
महापुराणेऽष्टमस्कंधेऽमृतमथने सप्तमोध्यायः ॥७॥ श्रीशुक उवाच ॥ पीते गरे वृषांकेन प्रीतास्ते
मरदानवाः ममंथुस्तरसा सिंधुं हविर्धानी ततोऽभवत् १ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवा
दिनः यज्ञस्य देवयानस्य मेध्याय हविषे नृप २ तत उच्चैःश्रवा नाम हयोऽभूच्चंद्रपांडुरः तस्मिन्ब
लिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ३ तत ऐरावतो नाम वारणेंद्रो विनिर्गतः दंतैश्चतुर्भिः श्वे
ताद्रेर्हरन्भगवतो महिं ४ ५
देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य संबंधिने हविषे २ ईश्वरशिक्षया प्रागेव कृतया ३

भा० अ० पदं आश्रयं ध्रुवं नित्यं अव्यभिचारिणो नित्याः संतो गुणा यस्मिन् तान्न्यविंदत तत्क्वचित्कस्यचित् दोषस्य सद्भावात्
२६ १९ तदेवाह नूनमिति त्रिभिः मन्युनिर्ज्जयो नास्ति दुर्वासःप्रभृतिषु गुरुशुक्रादिषु संगवर्ज्जितं ज्ञानं नास्ति महत्वे

विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपे
यादिषु नान्वविंदत १९ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्ज्जितं कश्चिन्महां
स्तस्य न कामनिर्ज्जयः स ईश्वरः किं परतो व्यपाश्रयः २० धर्मः क्वचित्तत्र न भूतसौ
हृदं त्यागः क्वचित्तत्र न मुक्तिकारणं वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न हि द्वितीयो गु
णसंगवर्ज्जितः २१ क्वचिच्चिरायुर्न्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः य
त्रोभयं कुत्र च सोप्यमंगलः सुमंगलः कश्च न कांक्षते हि माम् २२ ॥

पिब्रह्मसोमादीनं कामनिर्ज्जयः परतो व्यपाश्रयः परापेक्षः इंद्रादिः स किमीश्वरः २० न भूतसौहृदं परशुरामा
दिषु न मुक्तिकारणं त्यागः शिविप्रभृतिषु पुंसो कार्त्तवीर्यार्यमस्ति अजवेगनिष्कृतं कालवेगेन परिहृ
तं न भवति गुणसंगवर्ज्जितः सनकादिर्द्वितीयः मम वरो न हि समाधिनिष्ठत्वात् २१ ॥ २६

अभिषेचनिकाः अभिषेकोचिताः पंचगव्यानि मधुमाधवौ चैत्रवैशाखभवफलपुष्पादि पाठांतरे द्वंद्वैकं

अभिषेचनिका भूमिराहरत्सकलौषधीः गावः पंच पवित्राणि वसंतो मधुमाधवौ ११ ऋषयः
कल्पयांचक्रुरभिषेकं यथाविधि जगुर्भद्राणि गंधर्वा नट्यश्च ननृतुर्जगुः १२ मेघा मृदंगपण
वमुरजानकगोमुखान् व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् १३ ततोभिषिषिचुर्देवीं
श्रियं पद्मकरां सतीं दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १४ समुद्रः पीतकौशेय
वाससी समुपाहरत् वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां १५ भूषणानि विचित्राणि
विश्वकर्मा प्रजापतिः हारं सरस्वती पद्ममजो नागाश्च कुंडले १६ ततः कृतस्वस्त्ययनोत्प
लस्रजं नदद्द्विरेफां परिगृह्य पाणिना चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती
सुशोभनं १७ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ततस्ततो नूपुरव ४
ल्गु शिंजितैर्विसर्पती हेमलतेव सा बभौ १८ एवार्थः मधुमासेभवं मध्विति वा ११ अभिषेकं ४
अभिषेकोचितं विधिं नद्यः शंखवेणुवीणाश्च व्यनादयन् तुमुलो निःस्वनो येषां तान् मृदंगादीन् १५ १६

भा० अ० तदेवाह तस्यांसदेशे कमनीयां नवकंजमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ क
२७ थंभूतां मालां माद्यतो ये मधुव्रतास्तेषां वरूथस्य गिरा उपघुष्टां नादितां कथंभूता श्रीः सव्रीडहासेन विकसन्न
यनेन तस्य उरः स्वधाम याता सती वक्षः प्रतीक्षमाणा तस्थावित्यर्थः २४ भगवानपि लोकाभ्युदये स्ववक्षस्तस्याः

तस्यांसदेश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां तस्थौ निधाय निकटे तदुरः
स्वधाम सव्रीडहासविकसन्नयनेन याता २४ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासम
करोत्परमं विभूतेः श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान्
२५ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत २६
ब्रह्मरुद्रांगिरोमुख्याः सर्वे विश्वसृजो विभुं ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः २७ श्रियावलो
किता देवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां २८ निःसत्वा लोलुपा राज
न्निरुद्योगा गतत्रपाः यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः २९

स्थानं ददावित्याह तस्या इति विशिष्टा भूतयो विभवा यस्यास्त्रिजगतो जनन्याः श्रियः परमं सुस्थिरं ऐधय
त अवर्द्धयत् २५ तल्लिंगैर्विभुप्रतिपादकैः अवितथैर्यथार्थैः २७ २८ २९ रामरामरामराम

चिरायुष्यपि मार्कंडेयादौ शीलमंगलं नास्ति इंद्रियदमनशीलत्वात् क्कचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयुष
स्तु स्थैर्यं न वेद्यं दुर्ज्ञानं भगवद्द्वेषेणाकस्मादेव मृत्युसंभवात् यत्र कुत्र च श्री रुद्रे मार्कंडेयादिवत् इंद्रियदमनाद्य
भावात् शीलं मंगलं चायुर्निश्चयश्चेत्युभयमस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषस्तथापि सोप्यमंगलः श्मशानवा
सादमंगलचेष्टितः श्रीमुकुंदलक्ष्मीकृत्याह कश्चेति कश्चित्तु मंगलः निरवद्यश्च सन् तु मां न हि कांक्षते आत्मा

क्कचिच्चिरायुर्न्न हि शीलमंगलं क्कचित्तदप्यस्ति न वेद्यमायुषः यत्रोभयं कुत्र च सोप्यमंगलः सुमंगलः
कश्च न कांक्षति हि मां २२ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयसद्गुणाश्रयं
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितम् २३ ॥ ऽऽ ॥ ऽऽ ॥

रामत्वात् २२ एवं विमृश्य रमा निरपेक्षमपि मुकुंदमपि वरं वव्रे तत्किं अव्यभिचारिभिः सद्भिर्धर्मज्ञा
नादिभिर्गुणैर्निजैकाश्रयतया चनैरपेक्ष्येण वरं सर्वोत्तमं तत्र हेतुः अगुणाश्रयं प्राकृतगुणातीतं पा
ठांतरेप्ययमेवार्थः अतएव स्वस्य ईप्सितं किंच सर्वैर्गुणैरणिमादिभिरपेक्षितं वृत्तं अयं भावः यद्यपि स्व
यमात्मारामत्वेनान्यनिरपेक्षस्तथापि आश्रिता अणिमादिसिद्धीर्यथा नोपेक्षते तथा मामपि नोपेक्ष्य ता
वत्त्वेवत्तस्वयाहं कृतार्था स्यां किमन्यैः प्राकृतैरिति तमेव वरं तवतीति २३

तद्देवाह मिथइति तर्षःकामस्तद्युक्तानिचेतांसियेषां इत्येवं समवलानां कलिरभूत् ३८ दुर्वलानां
त्वाक्रोशप्रकारमाह देवाइतिद्वाभ्यां येदेवाः तुल्येनायासेन हेतुभूतश्रधनादियेषामितिवा सत्रयागेयथा
सर्वेषांसमंफलंतद्वत् तथाचश्रुतिः ऋद्धिकामाः सत्रमासीरन्निति येयजमानास्त ऋत्विज इति च ३९

मिथःकलिरभूत्तेषां तदर्थेतर्षचेतसां अहंपूर्वमहंपूर्वंन त्वंनत्वमितिप्रभो ३८ देवाःस्वं
भागमर्हंतिये तुल्यायासहेतवः सत्रयागइवैतस्मिन्नेषधर्मःसनातनः ३९ इतिस्वान्प्र
त्यषेधन्वैदैत्येयाजातमत्सराः दुर्वलाःप्रवलान्राजन्गृहीतकलशान्मुहुः ४० एतस्मि
न्नंतरेविष्णुःसर्वोपायविदीश्वरः योषिद्रूपमनिर्देश्यंदधारपरमाद्भुतं ४१ प्रेक्षणीयोत्पल
श्यामंसर्वावयवसुंदरं समानकर्णाभरणंसुकपोलोन्नसाननं ४२ नवयौवननिर्वृत्तस्तन
भारकृशोदरं मुखमोदानुरक्तालिझंकारोद्विग्नलोचनं ४३ विभ्रत्सुकेशभारेणमालामु
त्फुल्लमल्लिकां सुग्रीवकंठाभरणंसुभुजांगदभूषितम् ४४

४० ४१ सद्रूपंवर्णयतिपंचभिः प्रेक्षणीयमुत्पलमिवश्यामं सर्वेष्ववयवेषुसुंदरं समानयोःकर्णयोराभ
रणंयस्मिन्सुकपोलंतदुन्नतनासिकंचाननंयस्मिन् ४२ ४३ सुष्ठुग्रीवायस्मिन् कंठेआभरणंयस्मिन्तच्च
तच्च शोभनाग्रीवायेन तत्कंठाभरणंयस्मिन्निति वा सुभुजयोरंगदाभ्यांभूषितं ४४

वारुणीं वरुणदेवत्यां यद्वा अन्नमयी सुरा ३० ३१ दीर्घौ पीवरौ दोर्दंडौ यस्य कंबुग्रीवः शंखवन्नाभिरिव त्रिरेखा सुवृत्ता ग्रीवा यस्य ३२ स्निग्धकुंचितैः केशानामंतैरपि प्रियस्य ३३ इज्यभाक् यज्ञभोक्ता ३४ अमृतेन आभृतं परिपूर्णं ३५ ३६ मिथः दैत्यानां परस्परकलहोत्पादनेन योगमायया वोऽर्थं साधयिष्यामि अतो मा खिद्यतेत्यर्थः

अथासीद्वारुणी देवी कन्या कमललोचना असुरा जगृहुस्तां वै हरेरनुमतेन ते ३० अथोदधे मथ्यमानात्काश्यपैरमृतार्थिभिः उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ३१ दीर्घपीवरदोर्दंडः कंबुग्रीवोरुणेक्षणः श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ३२ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः स्निग्धकुंचितकेशांतः सुभगः सिंहविक्रमः अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ३३ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः धन्वंतरिरिति ख्यात आयुर्वेददृगिज्यभाक् ३४ तमालोक्यासुराः सर्वे कलशं चामृताभृतं लिप्संतः सर्ववस्तूनि कलशं तरसाहरन् ३५ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने विषण्णमनसो देवा हरिं शरणमाययुः ३६ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ३७ टी॰ स्कंधः ८

भा० श्र० २९ अस्तामिदं त्वद्दर्शनमीश्वरेणैव संपादितमित्याकूतं नूनमिति सर्वेन्द्रियाणां च मनसश्च प्रीतिं घृणेन किं
प्रेषितासि किं वा यदृच्छयैवागतासि नैवं नूनं प्रेषितैवेत्यर्थः ५ ६ भेदो विग्रहो यथा न भवेत्तथा ७ ८ संगताः

नूनं त्वं विधिना सुभ्रु प्रेषितासि शरीरिणां सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किं ५ सा त्वं नः स्प
र्धमानानामेकवस्तुनि भामिनि ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ६ वयं कश्यप
दायादा भ्रातरः कृतपौरुषाः विभजस्व यथान्यायं नैव भेदो यथा भवेत् ७ इत्युपामन्त्रितो दै
त्यैर्मायायोषिद्वपुर्हरिः प्रहस्य रुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ श्रीभगवानुवाच ॥
कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः विश्वासं पण्डितो जातु कामिनीषु न याति हि ९
सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां १०
श्रीशुक उवाच ॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः जहसुर्भावगम्भीरं ददुश्चामृतभाज
नं ११ ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा यद्यभ्युपेतं क्व च साध्वसा
धु वा कृतं मया वो विभजे सुधामिमां १२

अनुस्यूताः ९ हे सुरद्विषः १० भावेन केनाप्यभिप्रायेण गम्भीरं यथा भवत्येवं जहसुः ११ ईषत्स्मितेन
शोभा यस्यास्तया मया कृतं साधु वा असाधु वा यद्यभ्युपेतं अङ्गीकुरुत तर्हि विभजे १२ २९

विरंजांवरेणसंवीतोनितंवस्यवहिप:विशालत्वात तत्रशोभायस्या: तयाकांच्याप्रकर्षेणविलसत्त्वल्गुयथाभवत्येवं
चलतोम्भ्वरणयोर्नूपुरेयस्मिन् ४४ सव्रीडेस्मितेनसहविक्षिप्ताकंपिताया भ्रूस्तस्याविलासेनसहयान्यवलोकितानि
तैर्दैत्ययूथपानांचेत:समुद्भुर्मुहु:काममुद्दीपयन् ॥४६॥ इत्यष्टमेश्रष्टम:॥ च॥ नवमेमोहितेदैत्यैरर्थितेऽस्मतभाज

विरंजांवरसंवीतनितंवद्दीपशोभया कांच्याप्रविलसद्वल्गुचलच्चरणनूपुरं ४४ सव्रीडस्मितवि-
क्षिप्तभ्रूविलासावलोकनै: दैत्ययूथपचेत:सुकाममुद्दीपयन्मुहु: ॥४६॥ इतिश्रीमद्भागवतेम
हापुराणेष्टमस्कंधेऽष्टमोध्याय:॥ च॥ श्रीमत्कतवाच॥ तेन्योन्यमसुरा:पात्रंहरंतस्त्यक्तसोहृदा:
क्षिपंतोदस्युधर्माणआयांतींददृशुःस्त्रियं १ अहोरूपमहोधामअहोअस्यानवंवय: इतिते
तामभिद्रुत्यपप्रच्छुर्जातहृच्छया: २ कात्वंकंजपलाशाक्षिकुतोवाकिंचिकीर्षसि कस्या
सिवदवामोरुमथ्नंतीवमनांसिन: ३ नवयंत्वामरैर्दैत्यै:सिद्धगंधर्वचारणै: नास्पृष्टपूर्वांजा
नीमोलोकेशैश्चकुतोनृभि: ४
नेतद्वचनेनदेवेभ्योमृतंदत्तंतयेर्ष्यते १ अहोआसांसौंदर्यधामाद्युतिरितिवदंत: कात्वमित्यादिपप्रच्छु: २ म
थ्नंतीक्षोभयंतीच ३ कस्यासीत्युक्तंस्पष्टमस्माभि: यतस्त्वंनकेनचिद्दृष्टापूर्वैरित्याहु: नेतित्वांत्वां अमरादिभिर

लो

तां श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः कथंभूतां कनकमये कुंडले यस्याः सा चासौ चारवः कर्णादयो यस्याः
भा० अ० सा विगलितो विस्रस्तः स्तनपट्टिकाया अंतो यस्याः १८ एवं तान्मोहयित्वा यत्कृतवान् तदाह त्रिभिः असु
३० राणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं अन्याय्यं मत्वा तां सुधां तेभ्यो न व्यभजत् अयं भावः दैत्यैर्मे

तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्यां संवीक्ष्य संमुमुहुरुत्स्मितवी
क्षणेन देवासुरा विगलितस्तनपट्टिकांतां १८ असुराणां सुधापानं सर्पाणामिव दुर्णयं
मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९ कल्पयित्वा पृथक् पंक्तीरुभयेषां जगत्प
तिः तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु २० दैत्यान् गृहीतकलशो वंचयन्नुपसंच
रैः दूरस्थान् पाययामास जरामृत्युहरां सुधां २१ ते पालयंतः समयमसुराः स्वकृतं नृप तू
ष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया २२

दीयं साध्व साधु वा सर्वमनुमेयं वा नो मद्भक्तान्देवानेव सुधां पाययिष्यामि किंच ते यदि भागं विभजस्वे
त्युक्तं न च तेभ्यो जात्यैव क्रूरेभ्यो दानं न्याय्यं अतस्तेभ्यः सुधां न दद्यामिति १९ पंक्तीः पृथग्विधाय तांश्च
पंक्तिषु स्वेषु तत्सजातीयेषु तांश्चासुरानपि प्रतारणार्थमेवोपवेशयामास २० उपसंचरैर्वर्द्धमानप्रियवाक्या
दिना तामनतिक्रम्य गमनेन दूरस्थानपि देवान् २१ तया कृतः स्नेहो येषु स्त्रिया सह विवादस्य जुगुप्सया २२ ३०

असुरपुंगवाः दैत्यश्रेष्ठाः प्रमाणमियत्तामज्ञानंतः १३ १४ यथोपजोषं यथाप्रीति अहतस्य तत्क्षणं अहतं
यंत्रनिर्मुक्तं वासः स्वयंभुवा शस्तं मांगलिके षु तावन्मात्रेण सर्वदा प्राग्ग्रेषु कुशेषु विविश्नुः १५ धूपैरामो
दितायां सुरभीकृतायां शालायां १६ अतस्तस्यां शालायां - हेनरेंद्र साकत्तशापाणिराविवेश कथंभूतामणि

इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुंगवाः अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत १३ अथोपो
ष्यकृतस्नाना कृत्वा च हविषानलं दत्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः १४ यथोपजोषं वासां
सि परिधायाहतानि ते कुशेषु प्राविशन्सर्वे प्राक्कूलेष्वभिभूषिताः १५ प्राङ्मुखेषूपविष्टेषु स
रेषु दितिजेषु च धूपामोदितशालायां जुष्टायां माल्यदीपकैः १६ तस्यां नरेंद्र करभोरुलसद्दुकू लक्ष २
लश्रोणीतटालसगतिमदविह्वलाक्षी साकूजतीकनकनूपुरसिंजितेन कुंभस्तनी क[illegible]पाणिरथा
विवेश १७
वं धाद्यकनिष्ठं करस्य करभो बहिः करभसदृशौ सुवृत्तौ ऊरू यस्याः सा उ श त् कमनीयं दुकूलं यस्मिन्
तेन श्रोणीतटेन विशालया श्रोण्या अलसा मंदा गतिर्यस्याः सा पाठांतरे करभसदृशोर्वोः लसद्दुकूलं यस्याः
सा चासौ श्रोणीतटेन अलसगतिश्च मदेन विह्वले अक्षिणी यस्याः १७ रामराम राम ॥ ऽऽ ॥ राम

भा०अ० स्वदेवोपयाद्यति यदिति असवः प्राणाः वसु धनं प्राणादिभिर्देहात्मजादिषु नृभिर्यद्युज्यते देहाद्यर्थं यत्क्रि
३१ यते इत्यर्थः तदसत् व्यर्थं भवति कुतः पृथक्त्वात् भेदाश्रयत्वात् शाखानिषेचनवत् तैरेव प्राणादिभिरीश्वरो
द्देशेन क्रियते तत्तु सन्महाफलं भवति अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात् तत्र दृष्टांतः ॥ यत्तरोर्मूलनिषेचनं

यद्युज्यते सु वसु कर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ॥ तैरेव सद्भवति यत्क्रियतेऽपृ प १
थक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे नव
मोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं नृप युक्ताः कर्मणि यत्ताश्च वासु
देवपराङ्मुखाः १ साधयित्वामृतं राजन्पाययित्वा स्वकान्सुरान् पश्यतां सर्वभूतानां ययौ ग
रुडवाहनः २ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः अमृष्यमाणा उत्पेतुर्देवान्प्रत्यु
द्यतायुधाः ३

तत्र यथा सर्वस्य स्कंधशाखादेर्भवतीति यद्वा ल्यब्लोपे पंचम्यौ पृथक्त्वं
पर्यालोच्य भेददृष्ट्या तैरेव तत्क्षेत्रेषु यत्क्रियते तदसत् अपृथक्त्वं पर्यालोच्येश्वरदृष्ट्या तैरेव तेष्वेव
यत्क्रियते तत्सद्भवतीति शेषः समानं ॥ ४९ ॥ इत्यष्टमे नवमः ॥ ९ ॥ दशमे मत्सराद्दैत्यैरारब्धे तुमुले मृधे सुरैः ॥ दैत्यमा
याविषक्तेषु देवेष्वाविर्बभौ हरिः १ देवानाममृतप्राप्तिर्नाभक्तानामिति स्थितिम् ॥ भक्तमत्सरतः प्राणहानिपु
३१

कृतः अतिप्रणयः स्नेहो यैः प्रणयापायेन कातराः भीताः एते तावान्कृपयाः पूर्वं किंचित्पिवंतु धीराः इयं प्रसी
दत्वमित्यादि बहुमानेन च आबद्धाः नियंत्रिताः समपालनादिभिः षड्भिरेतैः कारणैर प्रियं किंचिदपि नोचुः
किं तु तूष्णीमासन् २३ देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोममममृतमपिबत् २४ हरिस्तस्य शिरो जहार अमृ

तस्यां कृतातिप्रणयाः प्रणयापायकातराः बहुमानेन चाबद्धा नोचुः किंचन विप्रियं २३ देवलिंग
प्रतिछन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः २४ चक्रेण क्षुरधारे
ण जहार पिबतः शिरः हरिस्तस्य कबंधस्तु सुधयाप्लावितोऽपतत् २५ शिरस्त्वमरतां नीतमजो ग्र
हमचीक्ळृपत् यस्तु पर्वणि चंद्रार्काव भिधावति वैरधीः २६ पीतप्रायेऽमृते देवैर्भगवांल्लोकभावनः
पश्यतामसुरेंद्राणां स्वरूपं जगृहे हरिः २७ एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयो
ऽपि फले विकल्पाः तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजःश्रयणान्न दैत्याः २८

वितः असंस्पृष्टः २५ २६ ग्रहं सूर्यादिवत् ग्रहत्वाधिकारिणं २७ हरिभक्तानामेवोद्यमः फलति नान्ये
षामित्येवमाख्यानतात्पर्यमाह एवमिति समादेशादयो येषां हेतुभेदराहित्येऽप्यर्थः समुद्रमंथनं विरुधादि
विविधकल्पाः फले केषांचिज्जातं केषांचिन्नेति वैचित्र्यं तत्र फलवैषम्यं तत्रोपसंहारकमुरित्यर्थः तदेवाह तत्रेतेषु यस्य

पादपंकजरजःश्रयणाद्देवा अमृतं फलमापुः स एव से
वेत्यर्थः यत्र दैत्यसंबंधात्पृथुज्यंते २८

भा० अ० वात्तेनोद्धूतैरुत्तरीयैः उष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्भिः १४ १५ १६ असुराणां याचमूः तस्याः पतिः स

३२ वातोद्धूतोत्तरोष्णीषैरर्चिभिर्वर्मभूषणैः स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः १४ देव

व२ दानवीराणां ध्वजिन्यौ पांडुनंदन रेजतुर्वीरमालाभिर्यादसामिव सागरौ १५ वैरोचनो वलि म२

संख्ये सोसुराणां चमूपतिः यानं वैहायसं नाम कामगं मयनिर्मितं १६ सर्वसांग्रामिकोपेतं स

र्वाश्चर्यमयं प्रभो अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनं १७ आस्थितस्तद्विमानाग्र्यं

सर्वानीकाधिपैर्वृतः वालव्यजनछत्राग्र्यै रेजे चंद्र इवोदये १८ तस्यासन्सर्वतो याने

र्यूथानां पतयोसुराः नमुचिः संवरो वाणो विप्रचित्तिरयोमुखः १९ द्विमूर्धा कालना

भोऽथ प्रहेतिर्हेतिरिल्वलः शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः २० हयग्रीवः शंकु

भे२ शिराः कपिलो मेघदुंदुभिः तारकश्चक्रदृक्शुंभो निशुंभो जंभ उत्कलः २१ अरिष्टोरिष्टनेमि

श्च मयश्च त्रिपुराधिपः अन्ये पौलोमकालेया निवातकवचादयः २२

वलिर्यानमास्थितः १७ उदये उदयगिरिशिखरे स्थितश्चंद्र इव विरेजे इति त्रयाणामन्वयः १८ १९ ३२

४ रणः संग्रामः उदन्वतः समुद्रस्य रोधसि तीरे बभूवुः ५ अन्योन्यं समासाद्य निजघ्नुः ६ ७ ८ ९ १० ११ १२ चित्रध्व

ततः सुरगणाः सर्वे सुधया पीतयैधिताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ४ तत्र दैवासुरो नाम रणः
परमदारुणः रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ५ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे समा
साद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानां भेरीडमरिणां महान् हस्त्यश्वरथपत्तीनां
नदतां निस्वनोऽभवत् ७ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः हया हयैरिभाश्चेभैः समसज्ज
न्त संयुगे ८ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः केचिद्गौरमृगैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः
९ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः १० शि
वाभिराखुभिः केचित्कृकलासैः शशैर्नरैः बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ११ अन्ये
जलस्थलखगैः सत्वैर्विकृतविग्रहैः सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः १२ चित्रध्व
जपटै राजन्नातपत्रैः सितामलैः महाधनैर्वज्रदंडैर्व्यजनैर्बर्हचामरैः १३

जपटादिभिश्च वीराणां मालाभिश्च राजिभिर्दैवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतु
रिति त्रयाणामन्वयः यादोभिरिति चासितैरमलैरातपत्रैश्च बर्हैश्छत्रचामरैश्च व्यजनैश्च १३ ॥ ऽऽ ॥ ऽऽ

मा० अ० ३३

निशुंभाभ्यां देवी ३१ ३२ ३३ ३४ ३५ ३६ आरोहयंत्यारोहा वाह्यास्तैः सहिताः अन्ये वाहाः एवं तु केवलं गजादयस्तुक्ताः
कथंभूतानि कृत्तावाह्कादयो येषां ३७ छिन्नानि ध्वजादीनि येषां तेषां देवादीनां पदाघातैः रथांगैश्चद्दलितादायोधना

एद्रुणा च तथा सोमः पुलोम्नायुयुधेऽनिलः निशुंभशुंभयोर्देवी भद्रकालीतरस्विनी ३१ वृषाकपिस्तु
जंभेन महिषेण विभावसुः इल्वलः सहवातापिर्ब्रह्मपुत्रैररिंदम ३२ कामदेवेन दुर्मर्षस्तुत्कलो मा
तृभिः सह बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ३३ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः
विश्वेदेवाश्च पौलोमै रुद्राः क्रोधगणैः सह ३४ त एवमाजावसुरेंद्रा देवेंद्रा द्वंद्वेन संहत्य च युध्यमा
नाः अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ३५ भुशुंडिभिश्चक्रगद
र्ष्टिपट्टिशैः प्रासकुल्मकैः प्राशुपरश्वधैरपि निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंडिपालैश्चशि
रांसि चिच्छिदुः ३६ गजास्तुरंगाः सरथाः पदातयः सर्वे सारोहा विविधाश्च खंडिताः निकृत्तबाहू
रुशिरोधरांघ्रयश्छिन्नध्वजेषासतनुत्रभूषणाः ३७ तेषां पदाघातरथांगचूर्णितादायोधनादुद्ध
तस्थिवांस्तदा रेणुर्दिशः खं च सुमार्गणं च च्छादयन्न्यवर्त्ततासृक्स्रुतिभिः परिस्रुतात् ३८

द्रुणा भूमेरुत्थितो रेणुर्दिशः खं च सुमार्गणं च सूर्यं च छादयंस्तदेवरवादेन्यवर्त्तत कथंभूतात् असृक्स्रुतिभिः प्रदारैः
परिस्रुतात् सिक्तात् यद्वा परिस्रुतात् हेतोर्न्यवर्त्तत भावे क्तः रक्तधाराणां नन्त्यर्यत्तमुच्छलनादित्यर्थः प्रथमांतपाठे

देवीमाहात्म्य ३८

३३

२३ २४ स्रवंतिप्रस्रवणादियस्मिन्नितिमदधारादृश्यं २५ नानावाहनादीनियेषांते २६ तेदेवाअसुरान्

स्क ३

अलब्धभागाःसोमस्यकेवलंक्लेशभागिनः सर्वएतेरणमुखेवहवोनिर्जितामराः २३॥
सिंहनादंविमुंचंतःशंखान्दध्मुर्महास्वनान् दृष्ट्वासपत्नानुत्सिक्तान्वलभित्कुपितोभृ
शं २४ ऐरावतंदिक्करिणमारूढःशुशुभेस्वराट् यथास्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५
तस्यासन्सर्वतोदेवानानावाहध्वजायुधाः लोकपालाःसहगणैर्वाय्वग्निवरुणादयः २६
तेन्योन्यमभिसंसृत्यक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधिनः २७ यु
योधवलिरिंद्रेणतारकेणगुहोस्यत वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेतिना २८ यम
स्तुकालनाभेनविश्वकर्मामयेनवै संवरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजिते
ननमुचिरश्विनौवृषपर्वणा सूर्योवलिसुतैर्देवोवाणज्येष्ठैःशतेनच ३०

थायुयुधुः २७ द्वंद्वान्येवाह योधेतिसप्तभिः अस्यतयुध्यतेत्यर्थः २८ २९ सूर्योदेवएकएवशतेनवलि
सुतैर्वाणोज्येष्ठोयेषांतैः ३०

भा० अ० टंकपर्वततत्तीक्ष्णाग्रैः शिखरैः सहिताः ४६ ४७ ४८ स्तनयित्नवश्च अंगारान्मुमुचुरित्यर्थः ४९ अधा

३४ ततोभिपेतुस्तरवो दह्यमाना दवाग्निना शिलाः सटंकशिखराश्चूर्णयंतो द्विषद्बलं ४६ महो
रगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः सिंहव्याघ्रवराहाश्च मर्दयंतो महागजाश्च ४७ यातुधा
स्कं ८ न्यश्च शतशः शूलहस्ता विवाससः छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ४८ ततो म
हाघना व्योम्नि गंभीरपरुषस्वनाः अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ४९ सृष्टो
दैत्येन सुमहान्वह्निः श्वसनसारथिः सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ५० ततः
समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत प्रचंडवातैरुद्धूततरंगावर्तभीषणः ५१ एवं दैत्यैर्महा
मायैरलक्ष्यगतिभीषणैः सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ५२ न तत्प्रति
विधिं यत्र विदुरिंद्रादयो नृप ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ५३ ॥

त्र आर्षः अधाक्षीदित्यर्थः ५० उद्धूतैस्तरंगैरावर्तैश्च भीषणः ५१ एवमन्यैश्च दैत्यैः सृज्यमाना
सु ५२ यत्र यदा तदा तैर्ध्यातः सन् ५३ रामराम ३४

शिरोभिर्महाभुजैश्च करभसदृशैरुरुभिश्च सारणाभूः प्रकर्षेणास्तृतासतीवभौ कथंभूतैः शिरोभिः उद्धृ
तानि उत्पतितानि किरीटानि कुंडलानि च येभ्यः तैः संरंभयुक्ता दृशो येषु तैः परिदष्टा दशनच्छदाः येषु ते ३९

शिरोभिरुद्धृतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः महाभुजैः साभरणैः सहायुधैः
साप्रास्तृता भूः करभोरुभिर्वभौ ३९ कवंधास्तत्र चोत्पेतुः पतितस्वशिरोद्विभिः उद्यतायु
धदोर्दंडैः राधावंतो भटा मृधे ४० वल्लिर्महेंद्रं दशभिस्त्रिभिरैरावतं शरैः चतुर्भिश्चतु
रो वाहानेकेनारोहमाछ्छयत् ४१ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः चिछेद नि
शितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे तां ज्वलं
तीं महोल्काभां हस्तस्थामछिनद्धरिः ४३ ततः शूलं ततः पाशं ततस्तोमरमृष्टयः यद्यच्छ
स्त्रं समादद्यात्सर्वं तच्छिनद्विभुः ४४ ससर्जाथासुरीं मायामंतर्धानगतोऽसुरः ततः
प्रादुरभूच्छैलः सुरानीकपरित्रभो ४५

पतितानि यानि स्वशिरांसि तत्र तैरात्मीयैस्तैः पश्यत इत्यर्थः उद्यतानि आयुधानि यैस्तैः दोर्दंडैर्युक्ताः

४० वाहान् ऐरावतः पादरक्षान् आरोहजयं
नारं आछ्छयत् विप्राः ४१ ४२ दुर्मर्षः असमानो
वल्लिः ४३ ४४ ४५

इत्यष्टमे दशमः॥१०॥ एकादशे तु देवेषु दैत्यघाति शुनारदः॥ देवानवारयच्छुक्रो मृतान्दैत्यानजीवय
 त्॥१॥ उदयच्छत् उद्यतवान्॥२॥३॥ निकृन्तन्त्यच्छीप्यैषां तान्बालान् जित्वा नटः कपटवृत्तिर्येषां ते षां धनं

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे दशमोध्यायः॥१०॥ श्रीशुक उवाच॥ अथो सुराः प्र
त्युपलब्धचेतसः परस्य पुंसः परयानुकंपया जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे
यैरभिसंहताः पुरा १ वैरोचनाय संरब्धो भगवान्पाकशासनः उदयच्छद्यदा वज्रं
प्रजा हा हेति चुक्रुशुः २ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितं॥ मनस्विनं सुसंपन्नं
विचरंतं महामृधे ३ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि जित्वा बालान्निबद्धाक्षा
न्नटो हरति तद्धनं ४ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवं तान्दस्यून्विधुनोम्य
ज्ञान्पूर्वस्माच्च पदादधः ५॥ बलिरुवाच॥ संग्रामे वर्त्तमानानां कालचोदितकर्मणां॥
कीर्त्तिर्जयोजयो मृत्युः सर्वेषां स्युरनुक्रमात् ६

हरति तथाहि मूढ मायेशान्जेतुमिच्छसि ४ मुत्सिसृप्संतीत्याह आरुरुक्षंतीति आरोहमिच्छंति ये च उत्स
र्पंति उल्लंघयितुमिच्छंतीत्यर्थः अधो विधुनोमि पातयामि ५ ६॥ ३५

अष्टा आयुधयुक्ता बाहवो यस्य श्रीवत्सकौस्तुभश्च अनर्घ्यं किरीटं च कुंडले च उल्लसंति श्रीकौस्तुभादी
नि यस्मिन् ५४ असुराणां कूटकर्म मंत्रादिप्रयोगः तस्माज्जाताः महिना महिम्ना हरेः स्मृतिरेव सर्वासांवि

ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः अदृश्यताष्टायुधबाहुरु
ल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ५४ तस्मिन्प्रविष्टे सुरकूटकर्मजा माया विनेशु
र्महिना महीयसः स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं ५५ दृष्ट्वा
मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनादथ कालनेमिः तल्लीलया गरुड
मूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ५६ माली सुमाल्यतिबलौ युधि पेत
तुश्चक्रेण कृत्तशिरसावथ माल्यवांस्तं आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोच्छि
नद्धरेर्नदतोरिणाद्यः ५७

पदां विमोक्षणरूपा किमुत हरेः प्रवेशादित्यर्थः ५५ इभारिवाहः अहि
नीत विंद्दुपतंतीं लेव तद्गृहीत्वा अहनत् ५६ यस्य चक्रेण कृत्तशिरसौ पेततुः तं तथाभूतमपि आहत्य संह
त्य अंडजेंद्रं गरुडमहनत् तेहत्तगदामुन्निन्य इत्यर्थः आद्योहरिः ५७ ॥

भा०अ० १६ १७ नमुचिः बलः पाकश्चेतित्रयस्तत्राजग्मुः १८ १९ जयार्णं पृथग्विक्रममाह हरीनितित्रिभिः हर्य्य
३६ तस्य तत्पूजयत्कर्म यंतुर्दानवसत्तमः शूलेन ज्वलता तं तु स्मयमानोहरन्मृधे १६ सेहेरुजं
सुदुर्मर्षं सत्वमालंब्य मातलिः इंद्रो जंभस्य संक्रुद्धो वज्रेणापहरच्छिरः १७ जंभं श्रुत्वा हतं त
स्य ज्ञातयो नारदादृषेः नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः १८ वचोभिः परुषैरिंद्र
मर्दयंतोस्य मर्मसुः शरैरवाकिरन्मेघाधाराभिरिव पर्वतं १९ हरीन्दशशतान्याजौ हर्य्य
नु श्वस्य बलः शरैः तावद्भिर्दयामास युगपल्लघुहस्तवान् २० शताभ्यां मातलिं पाको रथं साव
यवं पृथक् सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे २१ नमुचिः पंचदशभिः स्वर्णपुंखैर्म
हेषुभिः आहत्य व्यनदत्संख्ये सतोय इव तोयदः २२ सर्वतः शरकूटेन शक्रं सरथसार
थिं छादयामासुरसुराः प्रावृट्सूर्य्यमिवांबुदाः २३ अलक्षयंतस्तमतीव विह्वला विचुक्रुशु
र्देवगणाः सहानुगाः अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननावो यथार्णवे २४
श्वस्य इंद्रस्य तावद्भिः दशभिः शतैः २० २१ आहत्य इंद्रं विध्वा २२ प्रावृट्कालिनं सूर्य्यं २३ वणिक्पथा वणि
जंः भिन्ना नौर्येषां ते भिन्ननाव इत्यर्थः २४
३६

कालरसनंकालयंत्रितं अतोनहृष्यंति तत्रयूयमपंडिताः अनिपुणाः ७ तत्रकीर्त्तिजयाद्यैरात्मानंसाधनं
तमेवकालरशनंजनाःपश्यंतिसूरयः नहृष्यंतिनशोचंतितत्रयूयमपंडिताः॥७॥नवयंमन्यमाना
नामात्मानंतत्रसाधनं गिरोवःसाधुशोच्यानागृह्णीमोममर्मताडनाः॥चा॥श्रीशुक उवाच॥ इत्या
क्षिप्यविभुंवीरोनाराचैर्वीरमर्द्दनः आकर्णपूर्णैरहनदाक्षेपैराहतंपुनः ९ एवंनिराकृतोदे
वोवैरिणातथ्यवादिना नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः १० प्राहरत्कुलिशंतस्मा अमोघं
परमर्द्दनः सयानोन्यपतद्भूमौछिन्नपक्षइवाचलः ११ सखायंपतितंदृष्ट्वाजंभोवलिसखः
सुहृत अभ्ययात्सौहृदंसख्युर्हतस्यापिसमाचरन् १२ ससिंहवाहआसाद्यगदामुद्यम्यर
हसा जत्रावताडयच्छक्रंगजंचसुमहावलः १३ गदाप्रहारव्यथितोभृशंविह्वलितोगजः जानु
भ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १४ ततोरथोमातलिनाहरिभिर्दशशतैर्वृतः आनीतो
द्विपमुत्सृज्यरथमारुरुहेविभुः १५

मन्यमानंवोगिरोनगृह्णीमः मर्मस्पृक्ताडनंयाभिस्ताः ८ विभुमिंद्रोवीरोवलिः ९ तोत्रमंकुशः तेनाहतर

७ १० सयानः विमानसहितः ११ १२ १३ १४ १५

भा० अ
३७

सथापत्रैः पद्यैः ३४ सारमयं वीर्य्याधिकं त्वाष्ट्रं तप एव वृत्रः स येन वज्रेण पातितः ३५ दंडं लकुटतुल्यं
किमिदं दैवयोगेन भूतं लोकविमोहनं येन मे एवं मद्गीर्णां पक्षच्छेदः प्रजात्यये ३६ कृतो निवि
शतां भारे पतत्रैः पततां भुवि तप एव सारमयं त्वाष्ट्रं वृत्रो येन विपाटितः अन्ये चापि बलोपेताः
सर्वास्त्रैरक्षतत्वचः सोयं प्रतिहतो वज्रो मया मुक्तो ऽसुरे ऽल्पके नाहं तदाददे दंडं ब्रह्मतेजो
पवर्हणं ३६ इति शक्रं विषीदंतं आह वागशरीरिणी नायं शुष्कैरथो नार्द्रैर्वधमर्हति
दानवः ३७ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः अतो ऽन्यश्चिंतनीयस्ते उपायो म
घवन्रिपोः तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ध्यायन्फेनमथापश्यदु
पायमुभयात्मकं ३९ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः तं तुष्टुवुर्मुनिगणा मा
ल्यैश्चावाकिरन्विभुं ६० गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू देवदुंदुभयो नेदुर्नर्त
क्यो नन्तुर्मुदा ६१ अन्येप्येवं प्रतिद्वंद्वान्वायग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृगान्केशरि
णो यथा ६२
ब्रह्मतेजः दधीचेः सामर्थ्यं ३६ आर्द्रशुष्काभ्यां मृत्युर्नैवेति ३८ ३९ उभयात्मकत्वमेवाह न शुष्केण न चार्द्रे

३७

तुरासाडिंद्रः अश्वसहितोविनिर्गतः अग्रणीसारथिः २५ २६ २७ शोकामर्षाभ्यां युक्तयारुषाक्रोधेनान्वि
तःसन् इंद्रंहंतुंपरमोद्यमंचकार २८ घंटावत् घंटाभिर्युक्तम् २९ ॥ ऽऽ ॥ ३० ॥ ऽऽ ॥ ३१

ततस्तुराषाडिषुवर्षपंजरात्विनिर्गतःसाश्वरथध्वजाग्रणीः बभौदिशःखंपृथिवींविरोच
यन्स्वतेजसासूर्यइवक्षपात्यये २५ निरीक्ष्यपृतनांदेवःपरैरभ्यर्दितांरणे उदयच्छद्रिपुंहं
तुंवज्रंवज्रधरोरुषा २६ सतेनैवाष्टधारेणशिरसिवलपाकयोः ज्ञातीनांपश्यतांराजन्
जहारजनयन्भयं २७ नमुचिस्तद्वधंदृष्ट्वाशोकामर्षरुषान्वितः जिघांसुरिंद्रंनृपतेचकारपर
मोद्यमं २८ अश्मसारमयंशूलंघंटावद्धेमभूषणं प्रगृह्याभ्यद्रवत्क्रुद्धोहतोसीतिवितर्जयन्
२९ प्राहिणोद्देवराजायनिनदन्मृगराडिव ३० तदापतद्गगनतलेमहाजवंविचिच्छिदेहरिरि
षुभिःसहस्रधा ३१ तमाहनन्नृपकुलिशेनकंधरेरुषान्वितस्त्रिदशपतिःशिरोहरन् नतस्यहि
त्वचंवज्रःकुंठितोविभेदयःसुरपतिनौजसेरितः ३२ तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतो
नमुचिशिरोधरत्वचा तस्मादिन्द्राविभेच्छत्रोर्वज्रःप्रतिहतोयतः ३३

३२ अतिवीर्यंवृत्रमभिनदिति ३३ एमरामरामरा म ३३

भा० स्कं०
३८

हरिः सोमम पाययदितीदं निशम्य सयत्रास्ते तत्रस्तद्रूपं द्रष्टुं ययाविन्युत्तरेणान्वयः २ सोमयाउ मया
सह ३ त्वयि किंचिन्नेचाश्चर्यमेव यत्त्वाश्चर्यमानसाइतिवदन्नमहादेवस्तुष्टाव हरिमष्टभिः त्वयिमहामाया
विनिपरमश्चुरेनहिकिलकिंचिदघटितमिव वयंतु परमकौतूहलेन द्रष्टुमागताइतिवक्तुं धासंबोध
यन्स्तौति हे देवदेव कुतोऽहं देवानां देवइत्यतआह हेजगद्व्यापिन् ननुकुतः हेजगन्मय नहिकिंप्रधानं

वृषमारुह्यगिरिशः सर्वभूतगणैर्वृतः सहदेव्यामयोद्रष्टुं यत्रास्ते मधुसूदनः २ सभा
जितं भगवता सादरं सोमया भवः ॥ सूपविष्टउवाचेदं प्रतिपूज्यस्मयन्हरिम् ३ ॥ श्रीमहा
देवउवाच ॥ देवदेव जगद्व्यापिन् जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हे
तुरीश्वरः ४ आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म
चिद्भवान् ५
नहि हे जगदीश तच्चकुतस्तत्राह सर्वेषामपि त्वं हेतुः अतः ईश्वरः आत्मत्वाच्च न जडं
प्रधानत्वमित्यर्थः ४ ननु जगन्मत्त्वोक्त्या जगतैव उत्पत्त्यादिनाऽसत्त्वेन च जाड्येन च ममापि किं तथात्वम्
नेत्याह आद्यंतौ मध्यं च यस्य जगतो यन्त्र ब्रह्मणो भवंति यस्य च अव्ययस्य एतानि आद्यंतमध्या
नि न संति यच्च ब्रह्म इदं कारास्पदं द्रष्टु च बहिर्भोग्यं अन्यत् भोक्तृ तत्सत्यं च चिद्रूपं च ब्रह्मैव भवान् अतो न

३८

४३ ४४ अनुचरैर्ह्रियमाणैरनुचरैः ॥ सहेति वा ४५ अविनष्टा अवयवा येषां विद्यमानाः शिरोधरा येषां
तान् ४६ ॥ ४७ ॥ ४८ ॥ इत्यष्टमे एकादशः ॥ ११ ॥ द्वादशे मोहिनीरूपविभ्रममालोकनोत्सुकं ॥ भवं संमोहयामास
ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप ॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं ॥ ४३ ॥ ना
रद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः श्रियासमेधिताः सर्वे उपारमत विग्र
हात् ४४ ॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः उह्यमानानुचरैर्ययुः
सर्वे त्रिविष्टपं ४५ ये वशिष्टा रणे तस्मिन्नारदानुमतेन ते बलिं विपन्नमादाय अस्तंगिरि
मुपागमन् ४६ तत्राविनष्टावयवान्विद्यमानशिरोधरान् उशना जीवयामास संजीवन्या स्व
घ६ विद्यया ४७ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः पराजितोपि नाखिद्यल्लोकतत्त्वविच
क्षणः ४८ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे एकादशोध्यायः ॥ ११ ॥ श्रीबादरायणिरुवाच
वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् मोहयित्वा सुरगणान्हरिः सोमममपाययत् १ हरि ८
ष१
हरिःपुनरसांत्वयत्र अमुह्यन्नसुरान्विस्मुमोय यानन्तदद्भुतं इति चक्रंमहादेवमोहायमुपवर्ण्यते वृषध्वज

भा॰ अ॰ ३९ अनन्यत्वमनन्यत्वं चैकैकस्य कुत इत्याशंक्य दृष्टांतेनोपपादयति सदसत्कार्यकारणरूपं द्वयं अद्वयं च परमकार
णत्वमेवैकः कृतं कुंडलादिरूपद्वयं अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति
कथं तर्हि भेदस्प्रतीतिस्तत्राह अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तव वायं गुणव्यतिकरो भेदः न स्व
तः ८ अतएव केचिदयः त्वां वस्तुधावर्णयंति तत्वतस्तु केपि त्वं जानंतीत्याह द्वाभ्यां त्वां ब्रह्म वेदांतिनोऽवयंति

एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८ त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पु
रुषं परेशं अन्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ९ नाहं प
रायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः यन्मायया मुषितचेतस ईश
दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः १०

मन्यंते त्वामेव धर्मं मीमांसकाः मन्यंते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिण्याद्याः ज्ञाना क्रिया योगाप्र
ह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं पंचरात्राः महापुरुषं पातंजलाः ९ परायुर्ब्रह्मा सत्व
सर्गाः सत्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्वतो न जानंति किं पुनः त्वां हे ई
श अभद्रं राजसं तामसं च वृत्तं उत्पत्तिवृत्तिश्च येषां ते न जानंतीति किमुत वक्तव्यं १० ॥ ss ॥ ॥ ३९

भा॰ अ॰ अनन्यत्वमनन्यत्वं चैकैकस्य कुत इत्याशंक्याह दृष्टांतेनोपपादयति सदसत्कार्यकारणरूपं द्वयं अद्वयं च परमकार
३९ णत्वमेवैकः कृतं कुंडलादिरूपद्वयं अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति
कथं तर्हि भेदप्रतीतिस्तत्राह अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तवायं गुणव्यतिकरो भेदः न स्व
तः ८ अत एव कवयः त्वां बहुधा वर्णयंति तत्वतस्तु केपि त्वज्जानंतीत्याह द्वाभ्यां त्वां ब्रह्म वेदांतिनोऽवयंति

एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८ त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पु
रुषं परेशं अन्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ९ नाहं प
रायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः यन्मायया मुषितचेतस ईश
दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः १०

मन्यंते त्वामेव धर्मं मीमांसका मन्यंते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्र
ह्वी सत्या ईशानानुग्रहा चेत्येवं नवशक्तियुतं परं पंचरात्राः महापुरुषं पातंजलाः ९ परायुर्ब्रह्मा सत्व
सर्गाः सत्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्वतो न जानंति किं पुनः त्वां हे ई
श अभद्रं राजसं तामसं च वृत्तं तत्र वृत्तिर्येषां ते न जानंतीति किमुत वक्तव्यं १० ॥ ss ॥ ॥ ३९

तवैवंभूतत्वे मुमुक्षूणामाचारः प्रमाणमित्याह तवैवेति उभयतः इहामुत्र च संगं त्यक्त्वा ६ ननु ब्रह्मैव चेद
हं तर्हि संगोदासीनस्य मम चरणांभोजोपासनया च किं तेषां तत्राह त्वमिति ब्रह्मत्वेपि त्वं नात्यंतमुदासीनः किं
तु विश्वस्य प्रपंचस्योदयादीनां हेतुः तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्तत्फलदाता तर्हि किं राजादिव
त्कृपण्यपेक्षया सेवकेभ्यः फलं ददामि नहि नहि अनपेक्ष एव त्वं तर्हि किमीश्वरत्वेन तत्राह तैरात्मभिः त

त्वैव चरणांभोजं श्रेयस्कामा निराशिषः विसृज्य सर्वतः संगं मुनयः समुपासते ६
त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् विश्वस्य
हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः ७ ॥ ५५ ॥

त्फलदानार्थं मयेक्षत इति तदपेक्षा स्वस्य भाक्तं तदपेक्षतया अनपेक्षमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि
पूर्णममृतं च सुखरूपं विषयसुखं वैलक्षण्यार्थमाह अविकारं नित्यं आनंदमात्रं च कुतः विशोकं त
त्कुतः विगुणं किंच अनन्यत् न विद्यतेऽन्यद्यस्मात् ब्रह्मव्यतिरिक्ताभावादपि निरपेक्षस्त्वमित्यर्थः त
र्हि सर्वात्मकत्वे तत्तद्विकारप्रसंगो दुर्वारस्तत्राह अन्यत्सर्वस्माद्व्यतिरिक्तं च कारणत्वात् नह्येवंभूतः सुखा

त्मकब्रह्मरूपस्य तवान्यापेक्षास्ति अतः केवलं भक्ता
नुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः ७

भा० अ० ८० तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयो यस्मात् १६ १७ विचित्राणि पुष्पाणि अरुणाः पल्लवाश्च
येषां ते द्रुमा यस्मिन् लसद्दुकूलेन पर्यस्ता परिवृते नितंबे मेखला यस्याः तां १८ उत्पतत् पतत्कंदुकलीला
वशेन ये आवर्तनोद्वर्तने नमनोन्नमने ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहारयोः चारुभारैः प्रति पदं

तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम कामिनां बहुमंतव्यं संकल्पप्रभवोदयं १६
श्रीशुक उवाच॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्चक्षुर्भव आस्ते
सहोमया १७ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडतीं कंदुक
लीलया लसद्दुकूलपर्यस्तनितंबमेखलां १८ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्ट
हारोरुभरैः पदे पदे प्रभज्यमानामिव मध्यमश्चलत्पदप्रवालं नयतीं ततस्ततः १९
दिक्षुभ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्राजितकुं
डलोल्लसत्कपोलनीलालकमंडिताननाम् २०

मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंती १९ दिक्षुभ्रमतः कंदुकस्य चाप
लैश्चांचल्यैर्भृशं प्रोद्विग्नतारे आयते लोले चंचले लोचने यस्याः स्वकर्णाभ्यां विभ्राजिते ये कुंडले ताभ्यां
मुल्लसंतौ कपोलौ ताभ्यां च नीलालकैश्च मंडितमाननं यस्याः २०

३२

किंतुत्वंसर्वज्ञानासीत्याह सत्वंसर्वज्ञ्रवरुंत्से यान्नोपिजानासि किंतत्सर्वंसमीहितंस्वकृतंअदःस्थितिजन्मनाशं
अमुष्यजगतोजन्मादि भूतानामीहितं जाग्रतोभववंधं मोक्षंच यान्त्रीदृष्टांतः चराचराख्यंदेहजातंखंच
यथावायुराविशतितथाकथमवरुंधे तदात्मकतयातस्यसर्वस्यआत्मतयेत्यर्थः आत्महेतुः अगमः ज्ञानरूप

सत्वंसमीहितमदःस्थितिजन्मनाशंभूतेहितंचजगतोभववंधमोक्षौ वायुर्यथाविशति
खंचचराचराख्यंसर्वंतदात्मकतयावगमोवरुंत्से ११ अवतारामयादृष्टारममाणस्यतेगुणैः
सोहंतद्द्रष्टुमिछामियत्तेयोषिद्वपुर्धृतं १२ येनसंमोहितादैत्याःपायिताश्चामृतंसुराः तद्दि
दृक्षवआयाताःपरंकोतूहलंहिनः १३॥श्रीशुकउवाच॥एवमभ्यर्थितोविष्णुर्भगवान्शू
लपाणिना प्रहस्यभावगंभीरंगिरिशंप्रत्यभाषत १४॥श्रीभगवानुवाच॥कोतूहलाय
दैत्यानांयोषिद्वेषोमयाकृतः पश्यतासुरकार्याणिगतेपीयूषभाजने १५

इति ११ एवंस्तुत्वाप्रस्तुतंविज्ञापयति अवताराइतिद्वाभ्यां १२ १३ १४ सुरकार्याणियोषिद्वेषेणभ
विष्यंतीतिपश्यता अयंभाव अवश्यंतावदुन्मत्तान्दैत्यान्वंचयित्वा देवेभ्योमृतंदेयं नचैवंवेषमन्यंरू
पांतरेणकर्तुमुचितं अतोवंचनादिसारंकामिनीरूपंमयाधृतमिति १५ रामराम ॥ ऽऽ ॥ ऽऽ

भा० अ० २७ २८ २९ अंगहेराजन् ३० ३१ ३२ ३३ एवंतामनुधावन् हरः सरित् सरस्सुशैलादिषुचसन्निहि

६१ तमन्वगछद्भगवान्भवःप्रमुषितेंद्रियः कामस्यचवसंनीतःकरेणुमिवयूथपः २७ सोनुव्रज्य
तुवेगेनग्रहीत्वानेछतींस्त्रियं केशवंधेनुपानीयवाहुभ्यांपरिषस्वजे २८ सोपगूढ्वाभगवता
करिणाकरिणीयथा इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा २९ आत्मानंमोचयित्वांगसुरर्ष
भभुजांतरात प्राद्रवत्सापृथुश्रोणीमायादेवविनिर्मिता ३० तस्यासौपदवींरुद्रोविष्णोरद्भुत
व५ कर्मणः प्रत्यपद्यतकामेनवैरिणेवविनिर्जितः ३१ तस्यानुधावतोरेतश्चस्कंदामोघरेतसः शु
ष्मिणोयूथपस्येववासितामनुधावतः ३२ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः तानिरू
प्यस्यहेम्नश्चक्षेत्राण्यासन्महीपते ३३ सरित्सरस्सुशैलेषुवनेषूपवनेषुच यत्रक्वचासन्नृ
षयस्तत्रसन्निहितोहरः ३४ स्कन्नेरेतसिसोऽपश्यदात्मानंदेवमायया जडीकृतंनृपश्रेष्ठ
संन्यवर्ततकश्मलात ३५ अथावगतमाहात्म्यआत्मनोजगदात्मनः अपरिज्ञेयवीर्यस्य
नमेनेतदुहाद्भुतं ३६ तमविक्लवमव्रीडमालक्ष्यमधुसूदनः उवाचपरमप्रीतोविभ्रत्स्वांपौरुषीतनुं
३७ श्रीभगवानुवाच दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थितः यन्मेस्त्रीरूपयास्वैरंमोहितोप्यंगमायया
॥ ३८ ॥

तोवभव ३४ ३५ तदुहमाययाजडीकरणं ३६ ३७ स्वांनिष्ठां प्रकृतिम् ३८ एमरामरामरामरामरामरा ६१

संनह्यंतीव धृंतीजगाद्विमोहयंती २० तां वीक्ष्य देवः श्रीरुद्रः आत्मानं मंतिके स्थितामुमां स्वगणांश्च न
न वेद कथंभूतः इति एवंभूतया कंदुकलीलया ईषद्व्रीडगतयाश्चस्फुटं स्मितं तेन सह विसृष्टो यः कटाक्ष

श्लथद्दुकूलं कवरीं च विच्युतां संनह्यतीं वामकरेण वल्गुना विनिघ्नतीं चान्यकरेण कंदु
कं विमोहयंती जगदात्ममायया २१ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितवि
सृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिक उमां स्वगणांश्च
वेद २२ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः वासः ससूत्रं लघुमा
रुतो हरद्भवस्य देवस्य किलानुपश्यतः २३ एवं तां रुचिरापांगीं दर्शनीयां मनोरमां दृष्ट्वा त
स्यां मनश्चक्रे विसज्जंत्यां भवः किल २४ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः भवा
न्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ २५ सा तमायांतमालोक्य विवस्त्रा व्रीडिता भृशं
निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत २६

स्तेन मुष्टो वंचितः अत एव स्वयं यत्स्त्रियः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो
यस्य २२ ते कंदुकं अनुव्रजंत्याः स्त्रियाः लघुसूक्ष्मं वासः ससूत्रं कांचीसहितं २३ विसज्जंत्यां कुंचितकटाक्षै
रात्मानं निरीक्षमाणया २४ तत्पदं तस्याः समीपं
ययौ २५ २६

भा० अ० भगवताकृतं भक्तकृपापातं स्मरन्नमस्करोतेति ॥ असत्तामविषयं भावो भञ्जनं तेनागम्यमंघ्रिं प्रपन्नान् ॥ सिंधुम
६२ थ्ये सिंधोर्मथनेनोत्तममृतं यः आशयन् ॥ अभोजयत् ॥ ४७ ॥ इत्यष्टमे द्वादशः ॥ १२ ॥ त्रयोदशे तु वर्ण्यंते सप्तमादी
असदविषदमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं कपटयुवतिवेषो मोह
यन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोस्मि ४७ ॥ इति श्रीमद्भागवते महापुराणे अष्टम
शं स्कंधे करमोहनं द्वादशोध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्त
मो वर्तमानो यस्तदपत्यानि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः सर्यातिरेव च नरिष्यंतोथ ना
भागः सप्तमो दिष्ट उच्यते २ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः मनोर्वैवस्वतस्यैते दश
पुत्राः परंतप ३ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः अश्विनावृभवो राजन्निंद्रस्ते
षां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः जमदग्निर्भरद्वाज इति सप्तर्ष
यः स्मृताः ५ अत्रापि भगवज्जन्म कश्यपाददितेरभूत आदित्यानामवरजो विष्णुर्वामनरूपधृ
न्यनुक्रमात् मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् १ सप्तमादिमन्वंतराण्याह मनुरि क् ६
त्यादिना यावदध्यायसमाप्ति १ २ ३ आदित्यादयो देवा इत्यन्वयः ४ ५ भगवतो जन्मावतारः तमेवाह
आदित्यानां विवस्वानर्यमा पूषेत्याद्युक्तानां मध्ये अवरं जन्म यस्य सः ६ ॥ ५५ ॥ रामराम ॥ ५५ ॥ ५३ ६२

३९ कालेन सृष्ट्यादिनिमित्तेन मयाकालरूपेण भागशोरज्ञाद्यंशेन समेतामदधीनासती ४० ४१ ४२ ४३

कोनुमेतितरेन्मायांविसक्तस्त्वदृतेपुमान् तांस्तांविसृजतींभावान्दुस्तरामकृतात्मभिः ३९ सेयं
गुणमयीमायानत्वामभिभविष्यति मयासमेताकालेनकालरूपेणभागशः ४० श्रीशुकउ
वाच एवंभगवताराजन्श्रीवत्सांकेनसत्कृतः आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ४१
आत्मांशभूतांतांमायांभवानींभगवान्भवः शंसतामृषिमुख्यानांप्रीत्याचष्टाथभारत ४२
अपिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः अहंकलानामृषभोविमुह्येयथाऽव
शोन्येकिमुताऽस्वतंत्राः ४३ यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रान्तउपारतंवै सएषसा
क्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ४४ श्रीशुकउवाच॥ इतितेभिहितस्तातवि
क्रमःशार्ङ्गधन्वनः सिंधोर्निर्मथनेयेनधृतःपृष्टेमहाचलः ४५ एतन्मुहुःकीर्तयतो
नुशृण्वतोनरिष्यतेजातुसमुद्यमःक्वचित् यदुत्तमश्लोकगुणानुवर्णनंसमस्तसंसारपरिश्र
मापहं ४६

४४ अष्टाध्यायार्थनिगमनम् इतीति ४५ एतत्कीर्तनादौफलमाह एतदिति ४६ एमरामराम।

भा०स्कं० इदानीं तु स्वयोगतः आसते १६ १७ १८ अद्भुतः इंद्रः १९ २० २१ हविष्मत्प्रमुखाः इत्युक्तानामेव केषांचिन्नामा

४३ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः इदानीमासते राजन्स्वे स्वे आश्रममंडले १६ देवगुह्यात्स
रस्वत्यां सार्वभौम इति प्रभुः स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः १७ नवमो दक्षसावर्णिर्म
नुर्वरुणसंभवः भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृपाः १८ पारामरीचिगर्भाद्या देवा इंद्रः
अद्भुतः स्मृतः द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः १९ आयुष्मतोंऽबुधारायामृषभो भग
वत्कला भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः २० दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मह
न् तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः २१ तत्रापि जन्म भविता हरेर्विश्वसृजो गृहे श्री
पूर्त्तिरिति विख्यातो येनाप्यायते वै जगत् २२ हविष्मान्सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः
सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति जातः स्वां
शेन भगवान् गृहे विश्वसृजो विभुः २३ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् अनागता
स्तत्सुताश्च सत्यधर्मादयो दश २४ विहंगमाः कामगमा निर्वाणरुचयः सुराः इंद्रश्च वैधृतस्तेषा
मृषयश्चारुणादयः २५

न्याह हविष्मानिति २२ विषूच्यां जातः सन् २३ तस्य मनोरंतरं साधयिष्यति सत्यसहसः सूनृतायाश्च सुतः

सन् एकादशम इत्यादेरर्थः २४ २५

४३

शक्त्यावतारेणान्वितानि ७ अष्टमं मनुं वक्तुं कथामाह विवस्वत इति त्रिभिः ८ एके वडवां तृतीयामाहुः मम तु सं
ज्ञैव वडवेति मतं तदुक्तं षष्ठे सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवीति यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः

संक्षेपतो मयोक्तानि सप्त मन्वंतराणि ते भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ७ विवस्वत
श्च द्वे जाये विश्वकर्मसुते उभे संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ८ तृतीयां वडवामेके तासां
संज्ञासुतास्त्रयः यमो यमी श्राद्धदेवश्छायायाश्च सुतान्शृणु ९ सावर्णिस्तपती कन्या भार्या सं
वरणस्य या शनैश्चरस्तृतीयोभूदश्विनौ वडवात्मजौ १० अष्टमेंतर आयाते सावर्णिर्भविता म
नुः निर्मोकविरजस्काद्याः सावर्णितनया नृप ११ तत्र देवाः सुतपसो विरजा अमृतप्रभाः तेषां
विरोचनसुतो बलिरिंद्रो भविष्यति १२ दत्वेमां याचमानाय विष्णवे यः पदत्रयं राद्धमिंद्रपदं
हित्वा ततः सिद्धिमवाप्स्यति १३ योसौ भगवता बद्धः प्रीतेन सुतले पुनः निवेशितोधिके स्वर्गा
दधुनास्ते स्वराडिव १४ गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ऋश्यशृंगः पितास्माकं भग
वान्बादरायणः १५

सुताः ९ सावर्णिः पुत्रः १०।११ १२ पदत्रयं याचमानाय इमां सर्वां महीं सप्तमे मन्वंतरे दत्वा अष्टमे मन्वंतरे
विष्णोः प्रसादेन राद्धं लब्धं इंद्रपदं हित्वेत्यर्थः १३ १४ रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा १५ ॥ ६

युगसाहस्रेणपर्य्ययः परिवर्त्तोयस्ययुगसहस्रप्रमाणइत्यर्थः ३६॥ इत्यष्टमेत्रयोदशः॥१३॥ चतुर्दशेतु
सर्वेषांमन्वादीनांयथायथं पृथक्कर्माणिवर्ण्यन्तेभगवद्दशवर्त्तिनां १ पुरुषेणईश्वरेणयज्ञाद्यवतारैः

राजंश्चतुर्दशैतानित्रिकालानुगतानिते प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्रपर्य्ययः॥३६॥
इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेत्रयोदशोध्यायः॥१३॥ राजोवाच॥ मन्वंतरेषुभग
वान्यथामन्वादयस्त्विमे यस्मिन्कर्मणियेयेननियुक्तास्तद्वदस्वमे॥१॥ ऋषिरुवाच॥ म
नवोमनुपुत्राश्चमुनयश्चमहीपते इंद्राःसुरगणाश्चैवसर्वेपुरुषशासनाः॥२॥ यज्ञादयो
याःकथिताःपौरुष्यस्तनवोनृप॥ मन्वादयोजगद्यात्रांनयन्त्याभिःप्रचोदिताः ३ चतुर्युगां
तेकालेनग्रस्तान्श्रुतिगणान्यथा तपसाऋषयोऽपश्यन्यतोधर्मःसनातनः ४ ततो
धर्मंचतुष्पादंमनवोहरिणोदिताः युक्ताःसंचारयन्त्यद्धास्वेस्वेकालेमहींनृपाः ५॥

शास्यतेनियुज्यतइतितथा २ तदेवाह यज्ञादयइति ३ ऋष्यादीनांकर्माण्याह चतुर्युगांतइतिचतु
र्भिः यतः येभ्यः श्रुतिगणेभ्यः ४ उदिताः उक्ताः युक्ताःसंयत्ताःसंतोमहींधर्मंसंचारयंति मह्यांधर्मंप्र
वर्त्तयंतीत्यर्थः ५

२६ २७ २८ २९ ३० ३१ दिवस्पतेरिंद्रस्योपहर्त्तासंपादकः संभविष्यति ३२ ३३ ३४ क्रियातंतून्कर्मसं

आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति २६ भवितारु
द्रसावर्णीराजन्द्वादशमोमनुः देववानुपदेवश्च देवश्रेष्ठादयःसुताः २७ ऋतधामाचतत्रें
द्रोदेवाश्चहरितादयः ऋषयश्चतपोमूर्त्तिस्तपस्व्याग्नीध्रकादयः २८ स्वधामाख्योहरेरंशः
साधयिष्यतितन्मनोः अंतरंसत्यसहसःसूनृतायाःसुतोविभुः २९ मनुस्त्रयोदशोभाव्यो
देवसावर्णिरात्मवान् चित्रसेनविचित्राद्यादेवसावर्णिदेहजाः ३० देवाःसुकर्मसुत्राम
संज्ञाइंद्रोदिवस्पतिः निर्मोकतत्वदर्शाद्याभविष्यंत्यृषयस्तदा ३१ देवहोत्रस्यतनयउप
हर्त्तादिवस्पतेः योगेश्वरोहरेरंशोवृहत्यांसंभविष्यति ३२ मनुर्वाइंद्रसावर्णिश्चतुर्दशम
एष्यति उरुगंभीरवुद्ध्याद्याइंद्रसावर्णिवीर्यजाः ३३ पवित्राश्चाक्षुषादेवाःशुचिरिंद्रो
भविष्यति अग्निर्वाहुःशुचिःशुद्धोमागधाद्यास्तपस्विनः ३४ सत्रायणस्यतनयोवृहद्भानु
स्तदाहरिः वितानायांमहाराजक्रियातंतून्वितायिता ३५

त्तीः विमायिता विस्तारयिष्यति ३५ रामरामरामराम रामराम ३५ रामरामरामरामराम

भा० अ० ८
४५

इत्यष्टमे चतुर्दशः ॥१४॥ वलिं पंचदशे विश्वजिताऽथाप्याय्योऽग्र याजयन् ॥ ततोऽसौ स्वर्गमजयद्दयाद्देवालि
ल्पिरे अत्रैश्वर्यं ते न वाध्याय्यां वामनं वामनचेष्टितं ॥ निग्रह छलतायत्र वलेर्भूयाननुग्रहः ईश्वरः स्व
यं कृपणवत्कस्माद्धरिरयाचत ॥ लब्धार्थोपि भूत्वा तं कस्माद्बबंध ॥१॥ तत्रैतावद्बलेः त्रिलो

इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे चतुर्दशोऽध्यायः ॥१४॥ राजोवाच ॥ वलेः पदत्रयं
भूमेः कस्माद्धरिरयाचत भूतेश्वरः कृपणवल्लब्धार्थोपि ववंध तं १ एतद्वेदितुमि
छामो महत्कौतूहलं हि नः याच्ञेश्वरस्य पूर्णस्य वंधनं चाप्यनागसः २ श्रीशुक उवाच
पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन्भृगुभिः सजीवितः सर्वात्मना तानभज
द्भृगून्वलिः शिष्यो महात्मार्थनिवेदनेन ३ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्
विश्वजिता त्रिणाकं जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ४

कीमपहर्तुं याच्ञादिच्छलं कृतवानिति वक्तुं ब्राह्मणाराधनवलेन वलेरकांडएव स्वर्गविजयक्रममाह
पराजितश्रीरित्यादिना यावदध्यायसमाप्ति युद्धे पराजिता श्रीर्येन सः इंद्रेण असुभिश्च त्याजितः स
न् भृगुभिर्भृगोर्वंश्यैः शुक्रादिभिः महात्मा उदारचित्तः अर्थानां निवेदनेनार्पणेन ३ त्रिणाकं स्वर्गं जेतुमि

४५

प्रजापालामनुपुत्रास्तंधर्मंपालयंति यावदंतं यावन्मन्वंतरावसानंविभागशः पुत्रपौत्रादिरूपेणक्रमेण येचान्ये
द्यावापृथिव्यादयोयत्रकर्मणिभोक्तृत्वेनान्विताः तेश्चसह ६ ७ प्रसंगाद्रूपांतरैरपिजगद्धात्रा प्रवर्त्तनमा
ह ज्ञानमितिद्वाभ्यां सिद्धाःसनकादयः ऋषयोयाज्ञवल्क्यादयः योगेशादत्तात्रेयादयः तद्रूपःसन् ज्ञान

पालयंतिप्रजापालायावदंतंविभागशः यज्ञभागभुजोदेवायेचतत्रान्विताश्चतैः ६ इंद्रोभग
वताद‌त्तांत्रैलोक्यश्रियमूर्जितां भुंजानःपातिलोकांस्त्रीन्कामंलोकेप्रवर्षति ७ ज्ञानंचानु
युगंब्रूतेहरिःसिद्धस्वरूपधृक् ऋषिरूपधरःकर्मयोगंयोगेशरूपधृक् ८ सर्गंप्रजेशरू
पेणदस्यून्हन्यात्स्वराड्वपुः कालरूपेणसर्वेषामभावायपृथग्गुणः ९ स्तूयमानोजने
नैरेभिर्मायया नामरूपया विमोहितात्मभिर्नानादर्शनैर्नचदृश्यते १० एतत्कल्पविकल्प
स्यप्रमाणंपरिकीर्त्तितं यत्रमन्वंतराण्याहुश्चतुर्दशपुराविदः ११

कर्मचयोगंचब्रूते ८ प्रजेशामरीच्यादयस्तेनरूपेणसर्गंकरोतीतिशेषः स्वराड्वपुः राजमूर्त्तिः सर्वेषाम
भवायभवति पृथग्विधागुणाःशीलोमादयोयस्य ९ नामरूपात्मिकयामाययामोहितात्मभिरेभिर्ज
नैः नानादर्शनैः शास्त्रैःस्तूयमानोनिरूप्यमाणोपिनैवदृश्यतइत्यर्थः १० प्रासंगिकंनिरूप्यप्रस्तुत

भा० अ० स्पर्द्धां अतिसमृद्धां ११ धिग्ग्राम्यसुखं तथाविधां पुरीं अकस्मादेव परित्यज्येंद्रादयः पलायितास् इति वैराग्यार्थमिं
९६ द्रपुरीमनुवर्णयति रम्यामिति सार्द्धैरेकादशभिः उपवनानि फलप्रधानानि निकटानि च उद्यानानि पुष्पप्र
धानानि दूरस्थानि च तैर् रम्यां कूजंति विहंगमिथुनानि येषु गायंतो मत्ता मधुव्रता येषु १२ प्रवालादीनां भरे
भारे रम्याः सुन्नताः शाखा येषां ते अमरद्रुमा येषु तैः यत्र यासु सुरसेविताः प्रमदाः क्रीडंति ता हंसादिकुलैराकुला
वनो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः यया विद्धं पुरीं स्पर्द्धां कंपयन्निव रोदसी ११ रम्यामु
पवनोद्यानैः श्रीमद्भिर्नंदनादिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२ प्रवालफलपु
ष्पोरुभारशाखामरद्रुमैः हंससारसचक्राह्वकारंडवकुलाकुलाः नलिन्यो यत्र क्रीडंति
प्रमदाः सुरसेविताः १३ आकाशगंगया देव्या वृतां परिखभूतया प्राकारेणाग्निवर्णेन सा
ट्टालेनोन्नतेन च १४ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः जुष्टां विभक्तप्रपथां विश्व
कर्मविनिर्मिताम् १५
व्याप्ता भ नलिन्यः सरांसि यत्र येषु संति तैर् उपवनोद्यानैर् रम्यामिति पूर्वेणैवान्वयः १३ किंच परिखाभूतया
आकाशगंगया वृतां प्राकारेण सौवर्णेन च आवृतां अट्टालाः प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि
तत्सहितेन १४ रुक्मपट्टानि कपाटानि येषु तैः द्वारैः अंतरैः स्फटिकमयैर् गोपुरैश्च पुरद्वारैर् जुष्टां विभक्ताः
[illegible] ९६

हर्य्यश्वस्य इंद्रस्य येतुरंगास्तेषामिव वर्णो हरितो येषां ५ पुरटं सुवर्णं तूणो इषुधी अरित्रो अक्षयशरो पितामह:
ह: प्रह्लाद: जलजं शंखं ६ विप्रै रञ्जितः संपादितः योधनार्थो युद्धपरिकरो यस्य तैरेव कल्पितं स्वस्त्ययनं मंगल
वचनादियस्य आमंत्र्य पृष्ट्वा ७ अथारुह्य रथं राजेति द्वयोरन्वयः सुस्रग्धरः शोभनमालाधरः ८ हेमांगदाभ्यां

ततो रथं कांचनपट्टनद्धो हयाश्च हर्य्यश्वतुरंगवर्णाः ध्वजश्च सिंहेन विराजमानो ऽकुत्तास नाद्दास
हविर्भिरिष्टात् ५ धनुश्च दिव्यं पुरटेण नद्धं तूणावरित्रो कवचं च दिव्यं पितामहस्तस्य ददौ च
मालामम्लानपुष्पां जलजं च शुभ्रं ६ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनो ऽथ वि
प्रान् प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्चकार ७ अथारुह्य रथं दिव्यं भृगुदत्तं म
हारथः सुस्रग्धरो ऽथ संनह्य धन्वी खड्गी धृतेषुधिः ८ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः
रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ९ तुल्यैश्च ऐश्वर्य्यबलश्रीभिः स्वयूथ्यैर्दैत्ययूथपैः पिब
द्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव १०

बाहुभ्याम् लसंतौ चारू यस्य धिष्ण्यस्थः प्रज्वलितः कुंडस्थ आहवनीय इवेति वा ९ तुल्यैश्च ऐश्वर्य्यब
लं च श्रीश्च येषां तैर्दैत्ययूथपैर्दत्तो ययावितिद्वयोरन्वयः परिधानदिशः १० रामराम रामरामराम

भा॰ अ॰ उपदेवानां गंधर्वादीनां गीतकैः मनोरमां जितासां स्वाहीप्रा षात्री देवता यया तां अन्यैरजितप्रभामितिवा
८७ पाठांतरे ग्रहाः सूर्यादयो यया २१ यत् या २२ पृतनया सेनया २३ २४ केन हेतुना एवं तेजसा ऊर्जित

मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां
स्वप्रभया जितप्रभां २१ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः मानिनः कामिनो लुब्धा ए
भिर्हीना व्रजंति यत् २२ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया आचार्यद
त्तं जलजं महास्वनं दध्मौ प्रयुंजन् भयमिंद्रयोषिताम् २३ मघवांस्तदभिप्रेत्य बलेः परमसु
द्यमं सर्वदेवगणोपेतो गुरुमेतदुवाच ह २४ भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः अ
विषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २५ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः
पिबन्निव मुखेनेदं लिहन्निव दिशो दश दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः २६ ब्रूहि
कारणमेतस्य दुर्द्धर्षत्वस्य मद्रिपोः ओजः सहो बलं तेजो यत एतत्समुद्यमः २७

आसीत् २५ प्रतिव्योढुमपाकर्तुं २६ यतः कारणादेतत् ओज आदि यत ओज आदेः समुद्यमः २७ राम ८७

सभाऽप्रवेशस्थानानि चत्वराण्यंगनानि रथ्याउपमार्गाः तैराढ्यां संपन्नां न्यर्बुदं दशकोटयः तैर्गणनीयैर्
न्नतैर्विमानैर्युतां वज्रविद्रुममय्यो वेदयो येषु तैः शृंगाटकैश्चतुष्पथैर्युतां १६ नित्यं वयस्तारुण्यं रूपं च सौ
कुमार्य्यं स्वलंकृताः स्त्रियः यत्र यस्यां भ्राजंते १७ सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगंधिकस्रजां मामो

सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युतां शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः १६ यत्रनि
त्यवयोरूपाः श्यामाविरजवाससः भ्राजंते रूपवन्नार्य्यो ह्यर्चिभिरिव वह्नयः १७ सुरस्त्रीकेशवि
भ्रष्टनवसौगंधिकस्रजां यत्रामोदमुपादाय मार्गआवाति मारुतः १८ हेमजालाक्षनिर्गच्छद्धू
मेनागुरुगंधिना पांडुरेण प्रतिछन्नमार्गेयांति सुरस्त्रियः १९ मुक्तावितानैर्मणिहेमके
तुभिर्नानापताकावलभीभिरावृतां शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीत
मंगलाम् २०

दं १८ हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरस्त्रियः अप्सरसः १९ मुक्तामयैर्वितानैर्मणिहेमम
यैः केतुभिश्च ध्वजैर्नानापताकायुक्ताभिर्वलभीभिश्च विमानानां पुरोभागैरावृताम् व्याप्ताम् ॥
वैमानिकस्त्रीणां कलगीतैर्मंगलाम् २०

इत्यष्टमे पंचदशः ॥ १५ ॥ षोडशे पुत्रनाशेन शोचंत्या अदितेः पतिः प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्य्यते ॥ इदा
नीं श्रीवामनावतारप्रयोजनमाह एवमित्यादि यावत्समाप्ति नष्टेषु अदृष्टेषु सत्सु १ २ स कश्यपः पत्नीमिद
माह ३ दीनवदनत्वादिकमालक्ष्य वक्ष्यमाणधा विकल्पयन्पृच्छति अप्यभद्रमिति सप्तभिः हे भद्रे मर्त्त्योः छंदमिछामनुव

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे पंचदशोध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमा
तादितिस्तदा हृते त्रिविष्टपे दैत्यैः पर्य्यतप्यदनाथवत् १ एकदा कश्यपस्तस्या आश्रमं भगवानगात्
निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् २ स पत्नीं दीनवदनां कृतासनपरिग्रहः सभाजितो य
थान्यायमिदमाह कुरूद्वह ३ अप्यभद्रं न विप्राणां भद्रे लोकेधुनागतं न धर्मस्य न लोकस्य
मृत्योश्छंदानुवर्त्तिनः ४ अपि वाकुशलं किंचिद्गृहेषु गृहमेधिनि धर्मस्यार्थस्य कामस्य
यत्र योगो ह्ययोगिनां ५ अपि वातिथयोभ्येत्य कुटुंबासक्तया त्वया गृहादपूजिता याताः प्रत्यु
त्थानेन वा क्वचित् ६ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि यदि निर्यांति ते नूनं फेरुराजगृ
होपमाः ७ ॥ हरि हरि हरि हरि

तेन रतितथा मृत्युवशवर्त्तिनो जनस्येत्यर्थः ४ हे गृहमेधिनि अपि वा किं वा गृहेषु धर्मादेः किं
चिदकुशलमिति काका प्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादीनां योगफलं भवति ५ किंच त्वयात्र
पूजिता एवाभ्येत्य गृहाद्याताः ६ नार्चिताः अनर्चिताः संतो यदि निर्गच्छंति तर्हि गृहाः फेरुराज्ञः शृगालराज्ञः तदीय

उपभृतं तं संभृतं संवर्द्धितं २८ २९ अत्रोचितमंत्रमाह तस्माद्यूयंत्रिविष्टपमुत्सृज्य निलयमदर्शनं यात य
तः कालात् ३० केनास्य विपर्य्ययः स्यादित्यत आह एष इति विप्राणां बलेनोदर्कैः उत्तरउत्तरमधिकं फ

गुरुरुवाच ॥ जानामि मघवञ्छत्रोरुन्नतेरस्य कारणं शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः
२८ ॥ भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिं नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः २९ त
स्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपं यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्य्ययः ३० एष विप्रब
लोदर्कः संप्रत्यूर्जितविक्रमः तेषामेवावमानेन सानुबंधो विनंक्ष्यति ३१ एवं सुमंत्रितार्थास्ते गु
रुणार्थानुदर्शिना हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ३२ देवेष्वथ निलीनेषु बलि
र्वैरोचनः पुरीं देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयं ३३ तं विश्वजयिनं शिष्यं भृगवः शिष्यव
त्सलाः शतेन हयमेधानामनुव्रतमयाजयन् ३४ ततस्तदनुभावेन भुवनत्रयविश्रुतां कीर्तिं दि
क्षु वितन्वानः स रेज उडुराडिव ३५ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां कृतकृत्यमिवात्मानं मन्य
मानो महामनाः ३६

लयस्य सः ३१ सुमंत्रिताः अर्थकार्य्ये येषां ते निलयं जग्मुः ३२ ३३ एवं प्राप्तमिंद्रपदं स्थैरीकर्तुमयाजयन् अनु
व्रतं अनुवर्तिनं ३४ ३५ द्विजदेवैर्ब्राह्मणैरुपलम्भि
तम् ३६

भा० अ० सपत्नैर्दैत्यैर्हृताश्रीर्येषां हृतंस्थानंयेषामितिपुत्राभिप्रायेणबहुवचनं १५।१६ १७ कः कश्यपः प्रथमंतावत्तत्रस्नेहं
४९ त्याजयितुंविस्मयव्याजेनतत्त्वमुपदिशति अहोइतिसार्द्धेन १८ १९ अत्रापरितुष्यंतींप्रत्याह उपतिष्ठस्वेति

तस्मादीशभजंत्यामेश्रेयश्चिंतयसुव्रत हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्रभो १५ परैर्वि
वासितासाहंमग्नाव्यसनसागरे ऐश्वर्यंश्रीर्यशःस्थानंहृतानिप्रवलैर्मम १६ यथातानिपु
नःसाधोप्रपद्येरन्ममात्मजाः तथाविधेहिकल्याणंधियाकल्याणकृत्तम १७ एवमभ्यर्थि
तोदित्याकस्तामाहस्मयन्निव अहोमायावलंविष्णोःस्नेहवद्धमिदंजगत् १८ क्वदेहोभौति
कोनात्माक्वचात्माप्रकृतेःपरः कस्यकेपतिपुत्राद्यामोहएवहिकारणं १९ उपतिष्ठस्वपु
रुषंभगवंतंजनार्दनं सर्वभूतगुहावासंवासुदेवंजगद्गुरुं २० सविधास्यतितेकामा
न्हरिर्दीनानुकंपनः अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम २१ ॥अदितिरुवाच॥ केनाहंविधि
नाब्रह्मन्नुपस्थास्येजगत्पतिं यथामेसत्यसंकल्पोविदध्यात्समनोरथं २२ आदिशत्वंद्विजश्रे
ष्ठविधिंतदुपधावनं आशुतुष्यतिमेदेवःसीदंत्याःसहपुत्रकैः ॥२३॥

द्वाभ्यां २० नन्वेवंभूतंकामप्राप्तिहेतुंदेवसेवाप्रसिद्धातत्राह अमोघेति २१ यथाचमेमनोरथंमेविदध्यात्

२२ यथाचमेआशुतुष्यति तत्सेवाप्रकारमादिश २३ ४९

वेलायांहोमकालेकर्हिचित् नहुताकिं ८ ९ भवत्याआत्मानंमनःअस्वस्थमप्रकृतिस्थंलक्षणैर्मुखम्ला
न्यादिभिःलक्षयामि १०। अस्वास्थ्यकारणमन्यदस्तीतिवक्तुंत्वत्पृष्टमभद्रादिकंनास्तीत्याह भद्रमितिद्वा

अप्यग्नयस्तुवेलायांनहुताहविषासति त्वयोद्विग्नधियाभद्रेप्रोषितेमयिकर्हिचित् ८ यत्पू
जयाकामदुघान्यातिलोकान्गृहान्वितः ब्राह्मणोग्निश्चवैविष्णोः सर्वदेवात्मनोमुखं ९
अपिसर्वेकुशलिनस्तवपुत्रामनस्विनि लक्षयेस्वस्थमात्मानंभवत्यालक्षणैरहं १० अदि
तिरुवाच ॥ भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यच त्रिवर्गस्यपरंक्षेत्रंगृहमेधिन्गृहा
इमे ११ अग्नयोतिथयोभृत्याभिक्षवोयेचलिप्सवः सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति
१२ कोनुमेभगवन्कामोनसंपद्येतमानसः यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाषते १३
तवैवमारीचमनःशरीरजाःप्रजाइमाःसत्वरजस्तमोजुषः समोभवांस्तास्वसुरादिषुप्रभोतथा
पिभक्तंभजतेमहेश्वरः १४

न्यां इमेगृहाः त्रिवर्गस्यपरंक्षेत्रं उद्भवस्थानं त्रिवर्गोपियथावद्वर्त्ततइत्यर्थः ११ भगवतस्तवानुध्यानंयन्
मयाक्रियतेतस्मादग्नयोतिथयइत्यादिसर्वंनरिष्यति नहीयते १२ प्रस्तुतंविज्ञापयितुमाह कोन्विति

एवं सामान्यतो मत्वा पुण्यावतारान्प्रणमति त्रिभिः तत्रादौ मंत्रोक्त यज्ञरूपेण विष्णोः प्रणामो नम इति द्वे शीर्षे यस्य त्र
यः पादा यस्य तंतवे फलविस्तारकाय त्रय्यां विद्यायामात्मा यस्येति त्रिधा बद्ध इत्यस्यार्थः उक्तः तथा च मंत्रः चत्वारि
शृंगाणि त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महा देवो मर्त्यां आविवेशेति मार्गस्तुरुव
दात्मनः सोयं प्राज्ञैर्यथायथं। विष्णुस्तु यज्ञरूपेण स्तूयते तेन तत्त्वतः तथा च यास्कः चत्वारि शृंगेति वेदा एवोक्ताः

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ३१ नमः शिवाय रुद्रा
य नमः शक्तिधराय च सर्वविद्याधिपतये भूतानां पतये नमः ३२ नमो हिरण्यगर्भाय प्राणाय जगदा
त्मने योगैश्वर्यशरीराय नमस्ते योगहेतवे ३३ नमस्त आदिदेवाय साक्षिभूताय ते नमः नारायणा
य ऋषये नराय हरये नमः ३४ नमो मरकतश्यामवपुषेधिगतश्रिये केशवाय नमस्तुभ्यं नमस्ते
पीतवाससे ३५ २ म

त्रयोऽस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये
सप्त हस्ताः सप्त छंदांसि त्रिधा बद्धो मंत्रब्राह्मणकल्पैः वृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिः
यजुर्भिः सामभिर्यदेनमृग्भिः शंसंति यजुर्भिर्यजंति सामभिः स्तुवंति इति महादेवः इत्येष हि म
हादेवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनायेति ३१ ३२ प्राणाय सूत्रात्मने योगैश्व
र्यं शरीरं यस्य ३३ ३४ अधिगता प्राप्ता श्रीर्येन तस्मै ३५

मेमया पृष्टः पद्मजो ब्रह्मा मे यदुक्तमाह एतत्ते प्रवक्ष्यामीत्यन्वयः २४ अमले शुक्ले २५ तत्रादौ पूर्वेद्युः कृत्यमाह सिनी
वाल्यामित्यादिना ब्रह्मचार्य्यथ तद्‌द्वाभ्यामित्यं तत्तेन ग्रंथेन यदि लभ्येत तर्हि क्रोडविदीर्णया वन्यवराहोत्खाततया आ

कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ॥ यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणं २४
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः अर्चयेदरविंदाक्षं भक्त्या परमयान्वितः २५ सिनीवा
ल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् २६ त्वं देव्यादिव
राहेण रसायाः स्थानमिच्छता उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय २७ निवर्त्तितात्मनियमो
देवमर्चेत्समाहितः अर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि २८ नमस्तुभ्यं भगवते पुरु
षाय महीयसे सर्वभूतनिवासाय वासुदेवाय साक्षिणे २९ नमोऽव्यक्ताय सूक्ष्माय प्रधान
पुरुषाय च चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ३०

लिप्य २६ तत्र मंत्रस्त्वं देवीति हे देवि त्वं
रसायाः उद्धृतासि २७ निर्वर्त्तित आत्मनियमो नित्यनैमित्तिको येन २८ तत्रावाहनादौ नवमंत्रानाह
नमस्तुभ्यमिति पाद्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति २९ चतुर्विंशति गुणास्तत्त्वानि जानातीति
तथा तस्मै गुणसंख्यानस्य हेतवे सांख्यप्रवर्त्तकाय ३० ॥

भा० अ० सभाजितैस्तैरनुज्ञातः सन् शेषं बंधुभिः सहितः तस्यां रात्र्यां ब्रह्मचारी सन् सोऽभूत्तेप्रभाते सति ४४ ४५ पय
५१ भुंजीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ब्रह्मचार्यथ तद्रात्र्यां स्वप्यान्ते प्रथमेऽहनि ४४ स्नातः शुचिर्य
थोक्तेन विधिना स्तु समाहितः पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनं ४५ पयोभक्षो व्रतमिदं चरेद्वि
ष्णवर्चनादृतः पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ४६ एवं त्वहरहः कुर्याद्द्वादशाहं
पयोव्रतः हरेराराधनं होमं महर्हणं द्विजतर्पणं ४७ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोद
शी ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ४८ वर्जयेदसदालापं भोगानुच्चावचांस्त
था अहिंस्रः सर्वभूतानां वासुदेवपरायणः ४९ त्रयोदश्यामथो विष्णोः स्नापनं पंचकै
र्विभोः कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ५० पूजां च महतीं कुर्याद्वित्तशा
ठ्यविवर्जितः चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ५१ श्रुतेन तेन पुरुषं यजेत सुस
माहितः नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदं ५२ आचार्यं ज्ञानसंपन्नं वस्त्राभर
णधेनुभिः तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ५३
एवम् संप्र आहारो यस्य ४६ ४७ अधः स्वप्नं शयनं ४८ पंचकैः पंचामृतैः ५० ५१ ५२ ५३॥ ५१

५६ तत्पादपद्मयोः आमोदं स्पृहयंतश्च देवाश्च श्रीश्च यमन्ववर्त्तंत स मे प्रसीदतु ५७ आहवनेन पुरस्कृतं सन्मानि

त्वं सर्वेश्वरः पुंसां वरेण्य वरदर्षभ अतस्ते श्रेयसे धीराः पादरेणुमुपासते ५६ अन्ववर्त्तंत यं देवाः
श्रीश्च तत्पादपद्मयोः स्पृहयंतस्त्वामोदं भगवान्मे प्रसीदतां ५७ एतैर्मंत्रैर्हृषीकेशमावा
हनपुरस्कृतं अर्चयेच्छ्रद्धयायुक्तः पाद्योपस्पर्शनादिभिः अर्चयित्वा गंधमाल्याद्यैः पयसा
स्नापयेद्विभुं ५८ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः गंधपुष्पादिभिश्चार्चेद्द्वादशाक्षर
विद्यया ५९ शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ससर्पिस्सगुडं दत्वाज्जुहुयान्मूलवि
द्यया ६० निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयं दत्वाचमनमर्चित्वा तांबूलं च निवेदयेत्
६१ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मुदा ६२ कृत्वा
शिरसि तच्छेषं देवमुद्वासयेत्ततः द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं ६३

तं ५८ ५९ पयसि शृतं पक्वं पायसं मूलविद्यया द्वादशाक्षरेणैव ६० ६१ पूर्वोक्ताभिरन्याभिश्च स्तुति
भिः ६२ तस्य शेषं निर्माल्यं द्वौ अवरौ येषां तान् असंभवे द्वावपि भोजयेदित्यर्थः ६३

भा०अ० २३४ ५ प्रीतिविह्वलत्वादेवसाबद्धांजलिः सती स्थिताकेवलंईडितुंपुनर्नोत्सेहे नशशाक अपितु तूष्णीं
५२ बभूव कथंभूता आनंदजलेनाकुलेईक्षणेयस्याः पुलकैराकुलाआकृतिर्देहोयस्याः तस्यदर्शनेनयोऽत्युत्स
सा१
चिंतयंत्येकयाबुद्ध्यामहापुरुषमीश्वरं प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रया
बुद्ध्याभगवत्यखिलात्मनि वासुदेवेसमाधायचचारहपयोव्रतं ३ तस्याःप्रादुरभूत्तातभग
वानादिपुरुषः पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४ तंनेत्रगोचरंवीक्ष्यसहसोत्था
यसादरं ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धांजलिरीडितुंस्थितानो
त्सेहआनंदजलाकुलेक्षणा बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवे
पथुः ६ प्रीत्याशनैर्गद्गदयागिराहरिंतुष्टावसादेव्यदितिःकुरूद्वह उद्वीक्षतीसापि
अ७ बतीवचक्षुषारमापतिंयज्ञपतिंजगत्पतिं ॥७॥ अदितिरुवाच ॥ यज्ञेशयज्ञपुरुषाच्युततीर्थपाद
तीर्थश्रवःश्रवणमंगलनामधेय आपन्नलोकवृजिनोपशमोदयाद्यशंनःकृधीशभगवन्नसिदीननाथः
८
वस्तेनगात्रेवेपथुःकंपोयस्याः ६ तुष्टाव पिबतीवोद्वीक्षमाणेतिचक्रियाभेदात्सेत्यस्यपदस्यपदस्यद्विरुक्ति
रदोषः ७ अयंततोविनिर्जित्यदैत्यानत्तूर्जितानपि भक्ताभरक्षितुमीशःत्वमित्यस्तौददितिस्त्रिभिः यज्ञेशइ
त्यादिदशभिः संबोधनैस्तवाशक्यंकिमपिनास्तीतिवदंती प्रार्थयते शंनःकृधिकुरु यतोदीनानांनाथोसित्वं तीर्थे
५२

५४ ५५ ५६ ५७ मयाचनेसमुदाहृतं ५८ ५९ सर्वयज्ञाख्योयंयज्ञः सर्वव्रतमितिचस्मृतमेतद्व्रतं ६० द्
भोजयेत्तान्गुणवतासदन्नेनसुचिस्मिते अन्यांश्चब्राह्मणान्शक्त्यायेचतत्रसमागताः ५४ द
क्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ५५ भुक्तव
त्सुचसर्वेषुदीनांधकृपणादिषु विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबंधुभिः ५६ नृत्यवादित्रगीतै
श्चस्तुतिभिःस्वस्तिवाचकैः कारयेत्तत्कथाभिश्चपूजांभगवतोऽन्वहं ५७ एतत्पयोव्रतंनामपुरुषारा
धनंपरं पितामहेनाभिहितंमयातेसमुदाहृतं ५८ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवं आ
त्मनाशुद्धभावेननियतात्माभजाव्ययं ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतं तपःसारमिदं
भद्रेदानंचेश्वरतर्पणं ६० तएवनियमाःसाक्षात्तएवचयमोत्तमाः तपोदानंव्रतंयज्ञोयेनतु
ष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रयताश्रद्धयाचर भगवान्परितुष्टस्तेवरानाशुविधास्यति
६२ इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेकश्यपादितिसंवादेषोडशोध्यायः॥१६॥श्रीशुकउ
वाच॥इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै॥अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता॥१॥ म ४

स्य ष्टमे षोडशः॥१६॥ ततःसप्रदर्शोऽदित्याकृतेतस्मिन्व्रतेहरिः तत्कामपूरणायादौतत्पुत्रोभूदितीर्यते १

भा॰ अ॰ कांक्षितमेवाह तानिति त्रिभिः प्रतिलब्धो जयश्च श्रीश्च यैस्तैः पुत्रैः सह उपासितुं एकत्र स्थातुमिछसि १३
५३ १४ प्रत्याहृते यशश्च श्रीश्च यैस्तान् १५ अपारणीयाः अनतिक्रमणीयाः यद्यस्मात् अनुकूलईश्वरः॥

तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान प्रतिलब्धजयश्रीभिःपुत्रैरिछस्युपासितुं १३ इंद्र
ज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां स्त्रियो रुदंतीरासाद्य द्रष्टुमिछसि दुःखिता॥ १४ आ
त्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिछसि १५
प्रायोधुनाते सुरयूथनाथा अपारणीया इति देवि मे मतिः यत्तेनुकूलेश्वरविप्रगुप्ता न वि
क्रमस्तत्र सुखं ददाति १६ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ममा
र्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् १७ त्वयार्चितश्चाहमपत्यगुप्तये
पयोव्रतेनानुगुणं समीडितः स्वांशेन पुत्रत्वमुपेत्य ते सुतान गोप्तास्मि मारीचतपस्यधिष्ठि
तः १८
कालोयेषां ते विप्रैर्गुप्ता रक्षिताः अनुकूलैरीश्वरैः समर्थैर्विप्रैर्गुप्ता इति वा १६ मम मयाचिंत्य एव तत्र
हेतुः संतोषितस्येत्यादि श्रद्धानुरूपमिछानुसारेण फलहेतुत्वात् १७ मारीचस्य तपसि अधिष्ठाय स्थितः
५३

भूम्नेमहतेनमः महत्वेहेतवः विश्वायविश्वस्यभवनस्थितिसंयमार्थंस्वैरंगृहीतापुरुशक्तेर्मायागुणा
येनतस्मै तथापिस्वस्थाय अप्रच्युतस्वरूपाय कुतः शश्वदुपबृंहितः नित्योर्जितोयः पूर्णोबोधस्तेनव्या
पादितंनित्यनिरस्तंआत्मनितमोमायालक्षणंयेनतस्मै ९ अस्मदीयमनोरथपूरणमीषत्करमेवत्तवे

विश्वायविश्वभवनस्थितिसंयमायस्वैरंगृहीतपुरुशक्तिगुणायभूम्ने स्वस्थायशश्वदु
पबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते ९ आयुःपरंवपुरभीष्टमतुल्यल
क्ष्मीर्द्योभूरसासकलयोगगुणास्त्रिवर्गः ज्ञानंचकेवलमनंतभवंतितुष्टात्त्वत्तोनृणांकि
मुसपत्नजयादिराशीः १० श्रीशुकउवाच ॥ अदित्येवंस्तुतोराजन्भगवान्पुष्करेक्ष
णः क्षेत्रज्ञःसर्वभूतानामितिहोवाचभारत ॥ ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्यामे
विज्ञातंचिरकांक्षितं यत्सपत्नैर्हृतश्रीणांच्यावितानांस्वधामतः १२

तिकैमुत्यन्यायेनाह आयुःपरंब्रह्मवपुरपि द्यौर्भूर्भुवस्वर्रसारसातलंच द्योभूरसाः द्यौरितिपृथ
क्पाठे भूःस्वर्रसाश्चविलसर्गाः इतिगूढः रसेतिपाठे त्रीण्पिदानि सकलायोगगुणाअणिमाद
यः १० क्षेत्रज्ञःअंतर्यामी ११ सपत्नैर्हृताश्रीर्येषांतेषांस्वधामतःच्यावितानांपुत्राणांसंवर्धयितुं

भा० अ०
५४

अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्याः गर्भाय अर्भकाय वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु
प्रकाशमानायेत्यर्थः त्रयो लोका नाभौ यस्य सः त्रिणाभः तस्मै त्रयाणां लोकानां उपरि स्थिताय शिपिशब्देन पश
वो जीवास्तेषु अन्तर्यामितया प्रविष्टाय यज्ञो वै विष्णुः शिपियज्ञ एव पशुषु प्रतिष्ठितो इति श्रुतिः यद्वा शिपयो रश्मय
स्तैर्वेष्टितायेत्यर्थः तथापि विष्णवे व्यापिने २६ अंतःपतितं हरण्यादि यथा गंभीरं स्रोतः आक्षिपते आकर्षति तथा

नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे। त्रिणाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे २६ त्वमादि
रन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः। कालो भवानाक्षिपतीश विश्वं स्रोतो यथान्तः
पतितं गभीरं॥२७ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः दिवौकसां देव दि
वश्च्युतानां परायणं नौरिव मज्जतोऽप्सु २८॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे सप्त
दशोध्यायः॥१७॥ श्रीशुक उवाच॥ इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां॥
चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः॥१॥

कालात्मा भवान् विश्वमाक्षिपति २७ प्रजापतीनां त्वमेव संभविष्णुः उत्पादनशीलोसि अयं भावः न ह्येवंभूतस्य
तव जन्मादिसंभवः किंतु देवानां प्रजापतीनां च परमाश्रयत्वेन सत्कार्यसाधनाय अवतारोपि अन्तस्तान् स्वर्गच्यु
तान् पतनः स्वर्गे स्थापयितुं॥२८॥ इत्यष्टमे सप्तदशः॥१७॥ तत्र तस्य प्रादुर्भूत्वा वामनः सत्कृतोऽखिलैः य

२४

अतःपतिमुपाधावभजस्व १९ देवानांगुह्यंरहस्यं सर्वस्वसंहृत्वंस्वगुप्तंसतसंपद्यते सिध्यति २० प्रभोःहरेर
मनिजन्मलब्ध्वा २१ अवितथमीक्षणंदृष्टिर्यस्यसः २२ अनिलोयथासर्वत्रसमोपिदारुणिसंघर्षेणवनदाह

उपाधावपतिंभद्रेप्रजापतिमकल्मषं मांचभावयतीपत्याववेवंरूपमवस्थितं १९ नैतत्परस्मा
आख्येयंपृष्टयापिकथंचन सर्वंसंपद्यतेदेविदेवगुह्यंसुसंहृतं २०॥श्री शुक उवाच॥एतावदुक्त्वा
भगवांस्तत्रैवांतरधीयत अदितिर्दुर्लभंलब्ध्वाहरेर्जन्मात्मनिप्रभोः उपाधावत्पतिंभक्त्या
परयाकृतकृत्यवत् २१ सवैसमाधियोगेनकश्यपस्तदबुध्यत प्रविष्टमात्मनिहरेरंशंह्यवितथेक्ष
णः २२ सोदित्यांवीर्यमाधत्ततपसाचिरसंभृतं समाहितमनाराजन्दारुण्यग्निंयथानिलः २३
अदितेर्धिष्ठितंगर्भंभगवंतंसनातनं हिरण्यगर्भोविज्ञायसमीडेगुह्यनामभिः २४॥ब्रह्मोवाच॥
जयोरुगायभगवन्नुरुक्रमनमोस्तुते नमोब्रह्मण्यदेवायत्रिगुणायनमोनमः २५

कमग्निमाधत्ते एवंस्वयंपुत्रेषुसमोपिदैत्यपक्षक्षपणंवीर्यमाधत्तेत्यर्थः २३ धिष्ठितं अधिष्ठायस्थि

भा० अष्टमस्कंधटी० ८५

भा० अ० विशेषांतरमाह यस्यां द्वादश्यां ~~तैस्तुष्यौ~~ दस्यौपिस्ते विं हरेर्जन्मतत्तस्यामहन्येव विदुः तदा च मध्यंदिन
५५ गतः सविता तिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ६ शंखादयो ये तेषां अन्येषां चित्रवादि
त्रतूर्याणां च निर्घोषोऽभवत् ७ देवा मनव इत्यादीनां कुसुमैः समाकिरन्निति तृतीयेनान्वयः ८ ९ १०

द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो हनि विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ६ शंख
दुंदुभयो भेर्यो मृदंगपणवानकाः चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ७ प्रीताश्चाप्सर
सोऽनृत्यन् गांधर्वप्रवरा जगुः तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ८ सिद्धविद्याधरगणाः
सकिंपुरुषकिंनराः चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ९ गायंतोऽतिप्रशंसंतो नृत्यंतो
नृत्यंतो विबुधानुगाः अदित्या आश्रमपदं कुसुमैः समवाकिरन् १० दृष्ट्वादितिस्तं निजगर्भसं
भवं परं पुमांसं मुदमाप विस्मिता गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ११
यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः बभूव तेनैव स वामनो वटुः संपश्यतोर्दिव्य
गतिर्यथा नटः १२
११ विस्मयांतरमाह यत्तदिति यत्तद्वपुर्हरिर्दधार यत्प्रकटितवान् तेनैव व
पुषा मातापित्रोः संपश्यतोरेव वामनो वटुर्बभूव दिव्यगतिः अद्भुतचेष्टितः स्वयं कथंभूतः अव्यक्तचिद्रूपः कथम
५५

[illegible]

चकार्य्यलक्षणं वीर्य्यश्च प्रभावो यस्य स हरिरित्यां प्रादुर्बभूवेति त्रयाणामन्वयः अमृतमर्त्यमनुमनस्
न्यः शंखगदाब्जचक्राण्यस्य संतीति तथा अर्शआदित्वे नमत्वर्थीयोऽच्प्रत्ययः अविसर्गपाठे सच्चासौ
पिशंगवासाश्च १ झषराजो मकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीवदनांबुजे यस्य श्रीवत्सो वक्ष
सि यस्य वलयैरंगदैश्च सहोल्लसंति किरीटादीनि यस्य २ श्रीमत्या वनमालया विराजितः वेश्मगतं तमः २ अ

श्यामावदातो झषराज[illegible]कुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् श्रीवत्सवक्षा वलयांग
दोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया ह
रिः प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठनिविष्टकौस्तुभः ३ दिशः प्रसेदुः सलिलाशया
स्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगा
श्च ४ श्रोणाख्यां श्रवणद्वादश्यां मुहूर्तेभिजिति प्रभुः सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं ५

ग्निजिह्वा देवाः नगाः पर्वताः ४ तत्प्रादुर्भावसमयमाह श्रोणाख्यामिति भाद्रपदस्य कृष्णद्वादशी श्रवणद्वादशीति
प्रसिद्धा तस्यां तत्रापि श्रोणायं श्रवणस्थे चंद्र इत्यर्थः तत्रापि श्रवणस्य प्रथमांशे अभिजिति नक्षत्रे तच्च
श्रुतिदर्शितं अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढाया अधस्ताच्छ्रोणाया इत्येवं विशिष्टे मुहूर्ते प्रभुः प्रादुर्बभू
वेत्यर्थः किं च नक्षत्राण्यश्विन्यादीनि ताराः ध्रुवेनताराग्रहाः गुरुशुक्रोदयः ते आद्या येषां ते सूर्यादयोपि

भा० अ० तस्त्विगादयः सूर्यः किं स्वित्येवमादिव्यतर्कयन्निति शेषः २२ हयमेधवाटमश्वमेधमंडपं विवेश २३ उपवीताजि
५६ नोत्तरं उपवीतवद्धृतमजिनमेवउत्तरमुत्तरीयं यस्य २४ संहिप्ताः अभिभूताः सन्तः २५ रूपस्यानुरूपा अवयवं

तस्त्विन्नो यजमानः सदस्या हततत्विषो वामनतेजसा नृप सूर्यः किं स्वायात्युत वा विभावसुः सन
त्कुमारोथ दिदृक्षया क्रतोः २२ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः
सछत्रं सदंडं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटं २३ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं ॥
जटिलं वामनं विप्रं मायामाणवकं हरिम् २४ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः प्र
त्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा २५ यजमानः प्रमुदितो दर्शनीयं मनोरमं रूपा
नुरूपावयवं तस्मा आसनमाहरत् २६ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः अवनि
ज्यार्चयामास मुक्तसंगं मनोरमं २७ तत्पादशौचं कुलकल्मषापहं स धर्मविन्मूर्ध्न्यदधा
त्सुमंगलं यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या २८

यस्यानुहृष्टेति शेषः २६ २७ चंद्रमौलिश्चेत्यन्वयः अप्यर्थे चकारः चंद्रमौलिरपि गंगारूपं पयन्मूर्ध्ना

टी० अष्टमस्कंधे १८
५६

कर्मणि शिक्षातकर्मोदीति १३ १४ वनस्पतिः वनानांपतिः सोमः १५ १६ पात्रिकांभिक्षापात्रं १७ सर्ववंसंभावि
तोमारिषः श्रेष्ठोवटुर्ब्रह्मवर्चसेनब्रह्मर्षिगणान्जुष्टांतांसभामतिक्रम्यारोचत १८ १९ यदर्थंवटुर्वभूवतदाह अ

तंवटुंवामनंदृष्ट्वामोदमानामहर्षयः कर्माणिकारयामासुःपुरस्कृत्यप्रजापतिं १३ तस्योपनीयमा
नस्यसावित्रीसवितान्नवीत् वृहस्पतिर्ब्रह्मसूत्रंमेखलांकश्यपोददात् १४ ददौकृष्णाजिनंभूमि
र्दंडंसोमोवनस्पतिः कौपीनाछादनंमातादौश्छत्रंजगतःपतेः १५ कमंडलुंवेदगर्भःकुशान्सप्तर्ष
योददुः अक्षमालांमहाराजसरस्वत्यव्ययात्मनः १६ तस्मायुपनीतायर्यक्षराट्पात्रिकामदात्
भिक्षांभगवतीसाक्षादुमादादंबिकासती १७ सब्रह्मवर्चसेनैवंसंभावितोवटुः ब्रह्मर्षिगणसंयु
ष्टामत्यरोचतमारिषः १८ समिद्धमाहितंवह्निंकृत्वापरिसमूहनं परिस्तीर्यसमभ्यर्च्यसमिद्भिरजुहो
द्द्विजः १९ श्लाघ्यमेधैर्यजमानस्यक्षितिंवलिनभृगूणामुपकल्पितेस्ततः जगामतत्राखिलसारसंभृतो
भारेणगांसंनमयन्पदेपदे २० तंनर्मदायास्तटउत्तरेवलेर्यऋत्विजस्तेभृगुकच्छसंज्ञके प्रवर्तयं
तोभृगवःक्रतूत्तमंव्यचक्षतारादुदितंयथारविं २१
त्वित्याद्यियावत्समाप्ति यजमानंयजंतं भृगूणांभृगुभिरुपकल्पितैःप्रवर्तितैः अखिलेनसारेणवलेनसंभृतःसं
पूर्णः नर्मदायाउत्तरतटे भृगुकच्छसंज्ञकेक्षेत्रे क्रतूत्तमंप्रवर्तयंतोयेवलेर्ऋत्विजोभृगवस्तेतंव्यचक्षत अपश्य

सभा ५

न आगतंसमीपस्थोदितंरविमिव २१

भा० अ० दातुःस्तुतिः स्वयंतुष्टिरित्यादिप्रस्तुतोचितं वक्तव्यमिति भिद्यंस्तुप्रशंसयन्नाह वामनः २ वचस्तवैतदि
५७ तिषोडशभिः हे जनदेव सांपराये पारलौकिके धर्मे पितामहः प्रह्लादः प्रमाणं निःसत्त्वस्य लक्षणं यो हि

श्रीभगवानुवाच॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करं यस्य प्रमाणं भृग
वः सांपराये पितामहः कुलवृद्धः प्रशांतः २ न ह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमा
न् प्रत्याख्याता प्रतिश्रुत्य यो वादाता द्विजातये ३ न संति तीर्थे युधि चार्थिनार्थिताः पर
ङ्मुखा ये त्वमनस्विनो नृपाः युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः खे ४ य
तो जातो हिरण्याक्षश्चरन्नेक इमां महीं प्रतिवीरं दिग्विजये नाविन्दत गदायुधः ५ यं वि
निर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतं नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ६ नि
शम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ७

जातये याचकाय प्रत्याख्याता न ददामीति वक्ता कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो वा न दाते ७
ति ३ तीर्थे दानावसरे यत्र यस्मिन् युष्मत्कुले ४ यतः यस्मिन्कुले जातः ५ क्ष्मोद्धारे भूम्युद्धरणे ८
५७

हेआर्य्येत्वांसाक्षात्प्रत्यक्षंब्रह्म र्षीणांतपएवमन्येकथंभूतंतपः वपुर्द्धरंमूर्त्तिधारि २९ ३० त्वच्चरणा
वनेजनैर्वोभिर्हितमहाघस्यतस्यतेपुनीतापवित्रीकृता ३१ मेमत्तः प्रतीछगृहाण हेअर्हत्तमपूज्यतम ३२

वलिरुवाच॥ स्वागतंतेनमस्तुभ्यंब्रह्मन्किंकरवामते ब्रह्मर्षीणांतपःसाक्षान्मन्येत्वार्य्यवपुर्धरं
२९॥ अद्यनःपितरस्तृप्ता अद्यनःपावितंकुलं अद्यस्विष्टःक्रतुरयंयद्भवानागतोगृहान् ३० अ
द्याग्नयोमेसुहुतायथाविधिद्विजात्मजत्वच्चरणावनेजनैः हतांहसोवाभिरियंचभूरहो
तथापुनीतातनुभिःपदैस्तव ३१ यद्यद्वटोवांछसितत्प्रतीच्छमेत्वामर्थिनंविप्रसुतानुतर्क
ये गांकांचनंगुणवद्धाममृष्टंतथान्नपेयमुत्तवाविप्रकन्यां ग्रामान्समृद्धांस्तुरगान्गजान्वा
न्वारथानर्हत्तमसंप्रतीछमे ३२ इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेवलिवामनसंवादे
ऽष्टादशोध्यायः॥१८॥श्रीशुकउवाच॥ इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतं निशम्यभगवा
न्प्रीतःप्रतिनंद्येदमब्रवीत् १
अ
इतिअष्टमेअष्टादशः॥१८॥ऊनविंशेतुहरिणायाचितेचपदत्रये॥ प्रतिश्रुतेचवलिनाजानन्मरगुरवार भा० ८

भा० अ० एवं पूर्वजानस्तुत्वा तत्स्थितं सौत्ति पितेति द्विजवेषधारिभ्यो महद्भ्यो देवाय ते तमनुज्ञाय इति तद्विद्वानपि स
५८ याचितः सन् स्वीयमायुर्देवेभ्यो ददौ १४ १५ ममपदा संमितानि इति त्रिविक्रमपदाभिप्रायेण्य नचान्यत्त
वादस्तत्रापि स्वपदत्वानपगमात् १६ यावदर्थमेव प्रतिग्रहो यस्य सः १७ ईश्वरस्यापि याञ्चाप्रकारं चोक्त्वा व

पिता प्रह्रादपुत्रस्ते तद्विद्वान् द्विजवत्सलः स्वमायुर्द्विजलिंगेभ्यो देवेभ्योदान्स याचितः १४
भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः १५
तस्मात्त्वत्तो महीमीषद् वृणेहं वरदर्षभात् पदानि त्रीणि दैत्येंद्र संमितानि पदा मम १६ ना
न्यत्ते कामये राजन्वदान्याज्जगदीश्वरात् नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः १७ वलि
रुवाच १ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः त्वं वालो वालिशमतिः स्वार्थं प्रत्यवुधो यथा १८

लेर्वंधनं प्रश्नोत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह अहो इति त्रिभिः ते वाचो वृद्धानां संम
ल१ ताः त्वं तु वालः वालिशमतिश्च वालिशानामज्ञानामिव मतिर्यस्य अत एव स्वार्थं प्रतियथाय यावद्वुधः
वस्तुतस्तु वोद्धैव अवालिशमतिश्चेति छेदः स्वार्थं प्रत्यवुध इति च भक्तानामेवार्थं वुध्यसे न स्वार्थं वुध्यसे परिपू
र्णस्य तव तद्व्यतिरेकेण स्वार्थाभावादित्यर्थः १८

५८

८ पराग्दृशः चूहिर्दृष्टेः ९ अतो हृदये स्थितं मां न ज्ञास्यतीत्येवं निश्चित्य श्वासानिलेंतर्हितः स्वज्ञो देहोय
स्य विविग्नमतिः कंपितं चेतो यस्य अनुकंपितचित्त इति वा स्तवोऽर्थः १० न ददर्श अंतःप्रविष्टत्वात् ११
पुमान् यतः सकाशान्नावर्त्तते तद्ब्रह्मैव वा न गतः नित्यमुक्तत्वादिति वा स्तवोऽर्थः १२ एवं मृत्युपर्यन्तिम
तमायांतं समालोक्य शूलपाणिं कृतांतवत् चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः ८ य
तो यतोहं तत्रासौ मृत्युः प्राणवतामिव अतो हमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ९ एवं स निश्चि
त्य रिपोः शरीरमाधावतो निर्विविशे सुरेंद्र श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्न
चेताः १० स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद क्ष्मां द्यां दिशः खं विवरान् समुद्रा
न्विष्णुं विचिन्वन्न ददर्श वीरः ११ अपश्यन्निति होवाच मयान्विष्टमिदं जगत् भ्रातृहा मे गतो नूनं य
तो नावर्त्तते पुनः १२ वैरानुबंध एतावानामृत्योरिह देहिनां अज्ञानप्रभवो मन्युरहंमानोपबृंहितः १३
एवं विष्णोर्वैरं यत्कृतवान् तदुचितमेवा तस्य प्रतिहंतुः महाबलपराक्रमस्य शूराहंमानं स्तंभितवतो धातुर्वध
स्य कथं नामासौ शूरः शिरोमणिर्जीवन्नेव कातरवद्वैरमपेक्षितवान् इत्याशंक्याह वैरानुबंध एतावानामृत्यो
भवति हि देहिनां देहेष्वहंकाराभिमानवतां शूराणां तथा अहंमानेनोपबृंहितो मन्युश्च भवत्येव यतो ज्ञानप्रभवः

६२

९४

भा० अ० ५९

सिद्धोहं कृतार्थ एतावतैव सर्वस्वापहार सिद्धेरिति गूढोभिप्रायस्तद्देवाह वित्तं हियावत्प्रयोजनमेव सुखं
अधिकस्य क्लेशावहत्वादित्यर्थः २७ २८ २९ ३० अनयः अन्यायः ३१ अन्यायमेवाह एषइति ३२

तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं ॥२७॥ श्रीशुक
उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यतां वामनाय महीं दातुं जग्राह जलभाजनं २८
विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरं जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवरः ॥२९॥ श्रीशुक्र उ
वाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः कश्यपाददितेर्जातो देवानां कार्यसाधकः ३०
प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता नसाधु मन्ये दैत्यानां महानुपगतोनयः ३१ एष ते स्था
नमैश्वर्यं श्रियं तेजो यशः श्रुतं दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ३२ त्रिभिः क्रमैरि
मांल्लोकान्विश्वकायः क्रमिष्यति सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथं ३३ क्रमतो गां पदैकेन द्वि
तीयेन दिवं विभोः खं च कायेन महता तार्तीयस्य कुतो गतिः ३४

ननु मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह त्रिभिरिति क्रमता क्षितिचेत्तत्राह सर्वस्वमिति ३३ तथापि प्र
तिश्रुतं संपादनीयमेवेति चेत्तत्राह क्रमत इति द्वाभ्यां एकेन पादन्यासेन भूमिमाक्रम्य माणस्येत्यर्थः

तातीयस्य त्ततीयपादन्यासस्य ३४

अबुधत्वमेवाह मामिति द्वीपस्य दाशुषं दातारं बुद्धिमान् वस्तुतस्तु बुद्धिमानिति छेदः १९ कामं यथेष्टं सम्यकू
पादप्रसारणेनेत्यर्थः अतएव तथाकरिष्यति २० पुनरपि निस्पृहत्वमेवाविष्कुर्वन्नाह यावंत इति सप्तभिः

मो वचोभिः समाराध्य लोकानामेकमीश्वरं पदत्रयं वृणीते यो बुद्धिमान्द्वीपदाशुषं १९ न पुमान्
मामुपव्रज्य भूयो याचितुमर्हति तस्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीछ मे २०॥ श्रीभगवानुवा
च॥ यावंतो विषयाः प्रेष्टास्त्रिलोक्यामजितेंद्रियं न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप २१ त्रिभिः
क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते नववर्षसमेतेन सप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिपतयो
नृपा वैण्यगयादयः अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं २३ यदृच्छयोपपन्नेन संतुष्टो
वर्त्तते सुखं नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयं संसृतेर्हेतुरसंतोषोर्थका
मयोः यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः २५ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्द्धते तत्प्र
शाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६

२१ नववर्षसमेतेन द्वीपेनापि सप्तानां द्वीपवराणां इछया २२ तृष्णायाः अंतं न गता इत्यस्माभिः श्रुतं २३
असंतुष्टस्तु प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्त्तते २४ २५ आशुशुक्षणिरग्निः २६

एतद्देवदृष्टांतेनस्पष्टयति तद्यथावृक्षउत्पाटितसमूलः शुष्यति अचिरादेवउद्वर्तते पततिच एवंनष्टमनृतंयस्य
सआत्मादेहः शुष्येत् अद्यापिचश्रुत्याएवमेवानृतंवदन्नात्मानमाविर्मूलंकरोतीत्येवंनिंदयाअनृतंनिषि
द्धं तथाप्युपसंहारानुसारेणतत्केवलानृतविषयमित्यभिप्रेत्यैवंव्याख्यातं तदपेनत्वे तेनेतिचतथैवोक्तं त
थाचश्रुतिः ओमितिसत्यंनेत्यनृतं तदेतत्पुष्पफलंवाचोयत्सत्यं सहेश्वरोयशस्वी कल्याणकीर्तिर्भवि
ता पुष्पंहिफलंवाचः सत्यंवदत्यथैतन्मूलंवाचोयदनृतं तद्यथावृक्षआविर्मूलः शुष्यति सउद्वर्तते ए

तद्यथावृक्षउन्मूलःशुष्यत्युद्वर्ततेचिरात् एवंनष्टानृतःसद्यआत्माशुष्येन्नसंशयः ४०
पराग्रिक्तमपूर्णंवाअक्षरंयत्तदोमिति तद्यत्किंचोमितिब्रूयात्तेनरिच्येतवैपुमान् ४१

वमेवानृतंवदन्नाविर्मूलमात्मानंकरोति सशुष्यति सउद्वर्तते तस्मादनृतंनवदेदृयेतत्वे तेनेति एते
न अनेननृतु अनृतेन दयेत संकटेष्वात्मानंरक्षेदिति श्रुत्यर्थः ४० सर्वथासत्यवचनेनदेहोननिर्वहेदिति
स्फुटीकर्तुंसत्यस्यदोषान् अनृतस्यचगुणानाह पराग्गितिद्वाभ्याम् यदोमित्यक्षरं तत्पराक् दूरेअर्थंगृ
हीत्वांचतीतिपराक् रिक्तमितिश्रुतिपदस्यव्याख्यानमपूर्णंवेति तत्तस्मात् अर्थिनेयत्किंचिदोमिति दा
स्यामीतिब्रूयात् तेनोरिच्येत न्यूनोभवेत् ४१ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ६०

न्यै १

३५ तथापि सर्वस्वदानात्कीर्तिस्तावद्भविष्यतीति चेत्तत्राह न तद्दानमिति तपश्चित्तैकाग्र्यं कर्म पूर्तं ३६ ३७ ननु तर्हि प्रति
श्रुत्यनेति कथमनृतं वाच्यं तत्राह सार्द्धैः षड्भिः अत्रापि सत्यानृतव्यवस्थायां बह्वृचश्रुत्या हि प्रथमं ओमित्ति सत्यं नेत्य
नृतमि त्यादिना सत्यानृतयोर्लक्षण एव पूर्वकं स्तुतिनिंदाभ्यां सत्यं विहितं अनृतं च निषिद्धं अनंतरं च पराग्वा एत
द्रिक्तमक्षरमित्यादिना सत्ये दोषानृते च गुणमनुक्त्वोत्तमात्काल एव वदेद्यात्कालेन दद्यात्तत्सत्यानृते इति मिथुनीक

निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतं प्रतिश्रुतस्य योनीशः प्रतिपादयितुं भवान् ३५ न तद्दानं प्रशंसंति येन
वृत्तिर्विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसेर्थाय कामाय स्वजनाय च पंच
धा विभजन्वित्तमिहामुत्र च मोदते ३७ अत्रापि बह्वृचैर्गीतं शृणु मेसुरसत्तम सत्यमोमिति यत्प्रोक्तं
यन्नेत्याहानृतं हि तत् ३८ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते वृक्षेजीवति तन्न स्यादनृतं मूल
मात्मनः ३९

रोतीत्युपसंहारे एव वृत्तिसंकटादिष्वनृतमप्यनुज्ञातं तमिमं श्रुत्यर्थं दर्शयन्नाह ओमित्यंगीकारे यद्योक्तं तत्सत्यं
नेति नेति यदाह तदेवानृतं ३८ ननु सत्यमीषदनृतं विना न सिध्यतीत्याशयेनाह सत्यं पुष्पफलं विद्यात् जानीयात्
आत्मवृक्षस्य देहरूपस्य वृक्षस्य कुतो गीयते श्रुत्योच्यते इत्यर्थः पाठांतरं तु सुगमं यद्यपि श्रुत्या वाचः सत्यं पुष्पफ
लं चेत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तुतानुसारेणोक्तं भवतु पुष्पफलस्थानीयं सत्यं ततः
किमतआह वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात् सा न स्यादिति पाठे श्रुत्युक्ता या वाचः परामर्शः देहश्चानृतेन रक्ष्यो

भा० अं०
६१

इत्यष्टमे एकोनविंश: ॥१९॥ विंशे त्वन्ततमीतोऽसौ त्वात्वापि कपटं हरेः। ददावेव ततो विष्णुः सहसा वर्द्धितात्मा इत्थं
१ भगवता त्वया प्रोक्तं सत्यं योऽर्थकामादिकं न वाधेत स गृहमेधिनां धर्म इति २ कथं प्रत्याचक्षे निराकरोमि
मि ३ ४ नन्वप्रत्याख्याने दोषा उक्ताः तत्राह नाहमिति अधन्यात् दारिद्र्यात् मृत्योरपि ५ यद्यद्धनादिकं तेऽस्मि

इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे श्रीवामनचरिते एकोनविंशोऽध्यायः ॥१९॥ श्रीशुक उवा
च ॥ वलिरेवं गृहपतिः कुलाचार्येण भाषितः तूष्णींभूत्वा क्षणं राजन्नुवाचावहितं गुरुं १ वलिरुवा
च ॥ सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनां अर्थं कामं यशो वृत्तिं यो न वाधेत कर्हिचित् २ स चाहं
वित्तलोभेन प्रत्याचक्षे कथं द्विजं प्रतिश्रुत्य ददामीति प्राह्रादिः कितवो यथा ३ न ह्यसत्यात्परो
ऽधर्म इति होवाच भूरियं सर्वं वोढुमलं मन्ये ऋतेऽलीकपरं नरं ४ नाहं बिभेमि निरयान्नाधन्याद
सुखार्णवात् न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ५ यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धना
दिकं तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ६

वे संपरेतं मृतं पुरुषं जहात्येव ततः किमिति जीवतैव स्वयं न देयमिति भावः तथापि त्वावहृत्ति संकट
परिहारार्थमदेयमिति चेत्तत्राह तस्येति विप्रश्चेत्तेनार्थेन दत्तेनापि न तुष्येत्तर्हि तस्यार्थस्य त्यागे दाने किं निमि
त्तं न किंचित् याचितादल्पस्य दाने विप्रस्यासंतोषेण दानं व्यर्थमेव स्यात् अतस्त्वयाचितं सर्वं देयं न तु किंचिदिति ६१

किंच भिक्षवे सर्वमोंकुर्वन् दास्यामीत्यंगीकुर्वन् आत्मने कामेनालं पर्याप्तो न भवति तस्य भोगो न सिध्यतीत्य
र्थः तथा च श्रुतिः पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोंकु
र्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादिति नेति यदनृतं वचः एतत्पूर्णं अर्थव्ययाभावात् अभ्यात्मं चेति
चकारान्वयः आत्मनोभिमुखमन्यस्यार्थमाकर्षति इत्यभ्यात्मं यो हि नित्यं मम किंचिदपि नास्तीति सोहं
मीति ब्रूते स हि तेनानृतेन परेषामर्थो नाकर्षतीति प्रसिद्धं ६२ ननु तर्हि इदमनृतमेव सर्वदा सेव्यं स्या

भिक्षवे सर्वमोंकुर्वन्नालं कामेन चात्मने अथैतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ६२ सर्वं
नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः ६३ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे गोब्राह्म
णार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ६४

र नेत्याह सर्वमिति तथा च श्रुतिः अथैतत्पूर्णमभ्यात्मं यन्नेति तत्सर्वं नेति ब्रूयात् पापिकास्य कीर्ति
र्जायेत सैनं तत्रैव हन्यादिति ६३ अतो वृत्तिसंकरादिष्वनृतं न दोषायेत्युपसंहरति स्त्रीषु प्रोत्साहने
न वशीकारे नर्मणि परिहासे विवाहे च वरादिस्तुतौ गवां ब्राह्मणानां च हितार्थो हिंसायां च कस्यचित्प्रा
प्तायां तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति तथा च श्रुतिः तस्मात्काल एव
दद्यात् कालेन दद्यात्सत्यानृते मिथुनी करोतीति ६४

भा० अ० ६२

ननुनायंवटुः किंतुविष्णुस्तवशत्रुरित्युक्तं तर्हिसुतरामेवदास्यामीत्याह यजंतीति परःशत्रुर्वास्तु ११ १२
यद्यदियशोनजिहासति तर्हियुद्धेअयंमांहत्वाएनांभूमिंहरेत्तशयीतवासम्यग्ज्ञातःसन्ममचित्तेशयीयेतिवास्तवो

यजंतियज्ञंक्रतुभिर्यमादृताभवंतआम्नायविधानकोविदाः सएषविष्णुर्वरदोस्तुवापरोदास्याम्य
मुष्मैक्षितिमीप्सितांमुने ११ यद्यप्यसावधर्मेणमांबध्नीयादनागसं तथाप्येनंनहिंसिष्येभीतंब्रह्मत
नुंरिपुं १२ एषवाउत्तमश्लोकोनजिहासतियद्यशः हत्वामैनांहरेद्युद्धेशयीतनिहतोमया १३ श्री
शुकउवाच एवमश्रद्धितंशिष्यमनादेशकरंगुरुः शशापदैवप्रहितःसत्यसंधंमनस्विनं १४
दृढंपंडितमान्यज्ञस्तब्धोस्यस्मदुपेक्षया मच्छासनातिगोयस्त्वमचिराद्भ्रश्यसेश्रियः १५ एवं
शप्तःस्वगुरुणासत्यान्नचलितोमहान् वामनायददावेनामर्चित्वोदकपूर्वकं १६ विंध्यावलि
स्तदागत्यपत्नीजालकमालिनी आनिन्येकलशंहैममवनेजन्यपांभृतं १७ यजमानःस्वयं
तस्यश्रीमत्पादयुगंमुदा अवनिज्यावहन्मूर्ध्नितदपोविश्वपावनीः १८ तदासुरेंद्रंदिविदेवता
गणागंधर्वविद्याधरसिद्धचारणाः तत्कर्मसर्वेपिगृणंतआर्जवंप्रसूनवर्षैर्ववृषुर्मुदान्विताः १९

ष्यीः १३ अश्रद्धितमज्ञातमर्थं १४ १५ १६ जालकंमुक्ताभरणविशेषः तन्मालावती अवनेजनीनामपांक

६२

तर्हितद्देयमेवेतिचेत्तत्राह श्रेयइति दुस्त्यजैरसुभिरपिकोविकल्पोविचारः ७ यैर्दैत्येंद्रैर्युद्धेअनिवर्त्तिभिरियंभू
र्बुभुजेउपभुक्तातेषामिहलोकानूपरलोकांश्चभोगानितिवा कालोग्रसीत्संहृतवान् नतुभुवितैरधिगतंश्र
वं यशोग्रसीत् अतःकीर्त्तिरेवसाध्यानान्यदितिभावः ८ देहत्यागादपिधनत्यागेकीर्त्तिर्भवतीत्याह सुलभाइति

श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः दध्यङ्शिबिप्रभृतयःकोविकल्पोधरादिषु ७ येरियं
बुभुजेब्रह्मन्दैत्येंद्रैरनिवर्त्तिभिः तेषांकालोग्रसील्लोकान्नयशोधिगतंभुवि ८ सुलभायुधिवि
प्रर्षेह्यनिवृत्तास्तनुत्यजः नतथातीर्थआयातेश्रद्धयायेधनत्यजः ९ मनस्विनःकारुणिक
स्यशोभनंयदर्थिकामोपनयेनदुर्गतिः कुतःपुनर्ब्रह्मविदांभवादृशांततोवटोरस्यददामिवांछितं १०

तनुंत्यजंतीतितथा तीर्थेपात्रे आगतेसति दुष्करोधनत्यागएवमयाकार्यइतिभावः ९ तर्हिनिर्द्धनत्वेनदै
न्यंस्यादितिचेत्तत्राह मनस्विनइति यादृशत्तादृशानामप्यर्थिनांकामोपनयेनकामपूरणेनदुर्गतिर्दैन्य
मितियत्त तच्छोभनंभद्रमेवभवादृशानांतुकामोपनयेनदुर्गतिःशोभनमितिकिंपुनर्वक्तव्यमित्यर्थः

भा० अ०
६२

अंग हे राजन् समस्तान् रेफांश्च शद्वान् ६ द्यौश्चद्यां रं रेतसा रेतसि क्रमणेषु पादन्यासेषु ओषधिजा

हृद्यंग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेंदुम् श्रियं च वक्षस्यरविंदहस्तां कंठे च सा
मानि समस्तरेफान् ६ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि केशेषु
मेघान्श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं रं वाण्यां च छंदांसि रसे जलेशं भ्रु
वोर्निषेधं च विधिं च पक्ष्मसु अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभं ३ स्प
र्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं छायासु मृत्युं हसिते च मायां तनूरुहेष्वो
षधिजातयश्च ४ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च प्राणेषु गात्रे
स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः २५ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्म
लमापुरंग २६ सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषं पर्जन्यघोषो ज
लजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमाव
क्षयसायकौ च सुनंदमुख्या उपतस्थुरीशं पार्षदप्रधानाः सहलोकपालाः २७

नीश्च ४ प्राणेषु इंद्रियेषु २५ सर्वात्मनीत्यादि वाक्यांतरं २६ सुदर्शनमित्यादीनीशमुपतस्थुरि

तूणोत्तमावक्षयः विद्याधरसंज्ञकोऽसिः २७ ॥ ८२

६२

२० अवर्द्धत वांछातः प्रतिग्रहनाभिव बलिना पूर्वमुक्तत्वात् गुणत्रयमात्मनियस्य तत् अत एव भूः ख
मित्यादयो यद्यस्मिन् आसत स्थितवंतः २१ ऋत्विगादिसहितो बलिस्तत् हरेः काये एतद्विश्वं ददर्श

नेदुर्दुंदुभयः सहस्रशो गंधर्वकिंपुरुषकिन्नरा जगुः मनस्विनानेन कृतं सुदुष्करं विद्वान्
दाद्यद्रिपवे जगत्त्रयं २० तद्वामनं रूपमवर्द्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकं भूः खं दिशो
द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत २१ काये बलिस्तस्य महाविभूतेः सहर्त्वि
गाचार्यसदस्य एतत् ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तं २२ रसाम
चष्टांघ्रितलेथ पादयोर्महीं महीध्रान् पुरुषस्य जंघयोः पतत्त्रिणो जानुनि विश्वमूर्त्तेरूर्वोर्गणं
मारुतमिंद्रसेनः २३ संध्यां विभोर्वाससि गुह्य ऐक्षत् प्रजापतीन् जघने आत्ममुख्यान् नाभ्यां
नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालाम् २४ ५८

२२ तदेवं प्रपंचयति रसामिति पादोनैः सप्तभिः मारुतं गणं वायुसंघं इंद्रस्य सेनेव सेना यस्य सः
इंद्रपदे स्थितत्वात् २३ ऐक्षत ऐक्षत आत्मा स्वयं बलिर्मुख्यो येषां तान् असुरान् ऋक्षमालां नक्षत्र

तेरणत्वत्स्मृत्नः हेनरदेवरहहृतायोगिनश्च अंगानि शिक्षादीनि तत्संहिताश्च योग एव समीरस्तेन दी
पितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्मकल्मषं कर्मफलं येषां ते च सर्वे त्वत्तमंघ्रिं ववंदिरे यस्यांघ्रेः स्म

वेदोपवेदा नियमा यमान्विता स्तर्केतिहासांगपुराणसंहिताः ये चापरे योगसमीरदीपितज्ञा
नाग्निना रंधितकर्मकल्मषाः ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं १
अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकं समर्च्य भक्त्याभ्यगृणच्छुचि
श्रवा यन्नाभिपंकेरुहसंभवः स्वयं २ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्र
तया नरेंद्र स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ३ ब्रह्मा
दयो लोकनाथाः स्वनाथाय समाहृताः सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये तोयैः
समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः स्तवनैर्ज
यशब्दैश्च तद्वीर्यमहिमांकितैः नृत्यवादित्रगीतैश्च शंखदुंदुभिनिःस्वनैः ५

स्मरणानुभावतः अकर्मकं कर्मभिरप्राप्यं १ विष्णोरंघ्रये स्वयं यस्य नाभिपंकेरुहसंभवः तस्य विष्णोरंघ्रि
समभ्यर्च्य २ लोकत्रयं निमार्ष्टि पवित्रयति ३ संक्षिप्ता उपसंहृता आत्मविभूतिः स विस्तारो येन तं

मीनकुंडलेमकरकुंडले स्फुरंतिविकिरीटादीनियस्यसः मधुव्रतानांस्रजोयस्यांतयावनमालश्रीव
त्सादिभिश्चावृतोयातः २८ उरुक्रमत्वमत्वमेवाह क्षितिमिति द्वितीयंपदंक्रमतोविविष्टपंत्रिविष्ट
पंतदीयंकिंचिन्मात्रंजातं तृतीयायतुनकिंचित ॥२९॥ तत्रहेतुः उरुक्रमस्यांघ्रिस्त्रिविष्टपादुपर्युप
रिगच्छन्महर्जनाभ्यांतपसःपरंगतः सत्यलोकंगतइति ॥३०॥ इत्यष्टमेविंशतितमः ॥२०॥ एकविंशे

स्फुरत्किरीटांगदमीनकुंडलश्रीवत्सरत्नोत्तममेखलांबरैः मधुव्रतस्रग्वनमालयावृ
तोरराजराजन्भगवानुरुक्रमः २८ क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिशश्च
बाहुभिः पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयायतदीयमण्वपि २९ उरुक्रमस्यांघ्रि
रुपर्युपर्यथोमहर्जनाभ्यांतपसःपरंगतः ॥३०॥ इतिश्रीमद्भागवतेमहापुराणेऽष्टमस्कं
धेविंशोध्यायः ॥२०॥ श्रीशुकउवाच ॥ सत्यंसमीक्ष्याब्जभवंनखेंदुभिर्हतस्वधामद्युतिरावृतोभ्य
गात् मरीचिमिश्राऋषयोबृहद्व्रताः सनंदनाद्यानरदेवयोगिनः ॥

पदाक्रांतिमिषेणबलिवंचनं विष्णुनाकृतमुत्कर्षंतस्यख्यापयितुंजने १ उरुक्रमस्यांघ्रिस्तपसःपरं
गतइत्युक्तं ततःकिंवृत्तंतदाह सत्यंसत्यलोकंप्राप्तमंघ्रिंसमीक्ष्याब्जभवोभ्यगात् तथामरीचिमिश्राऋ
षयश्चेतिद्वयोरन्वयः कथंभूतोऽब्जभवः हरेरंघ्रेर्नखाएवेंदवस्तैर्हतास्वधाम्नोद्युतिर्यस्यसः स्वयंच ॥

भा०अ०२४ अर्थकृत अनुकूलः १५ पौरुषैस्तं कालमतिवर्त्तितुं प्रभा नीश्वरः समर्थो न भवति १६ १७ १८

६५

हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः वारयामास संरब्धान्काव्यशापमनुस्मरन् १४
हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः मायुध्यत निवर्त्तध्वं न नः कालोयमर्थकृत १५ यः प्र
भुः सर्वभूतानां सुखदुःखोपपत्तये तं नातिवर्त्तितुं दैत्याः पौरुषैरीश्वरः पुमान् १६ यो नो भ
वाय प्रागासीदभवाय दिवौकसां स एव भगवानद्य वर्त्तते तद्विपर्ययं १७ बलेन सचि
वैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः सामादिभिरुपायैश्च कालं नात्येति वै जनः १८ भवद्भिर्नि
र्जिता ह्येते बहुशोनुचरा हरेः दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः १९ एतान्वयं विजे
ष्यामो यदि दैवं प्रसीदति तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते ॥२०॥ श्रीशुक उवाच ॥
पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः रसां निर्विविशू राजन्विष्णुपार्षदताडिताः २१
अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितं बबंध वारुणैः पाशैर्बलिं सुत्येहनि क्रतौ २२

हरेरनुचराः देवाः दैवेन ऋद्धैः समृद्धैः भवद्भिः १९ अर्थत्वाय अनुकूलत्वाय २० २१ विष्णुपदिष्टु राजन्
इति विराट् प्रभोश्चिकीर्षितं ज्ञात्वा अयमर्थः अस्य सर्वस्वापहारे एतमममेत्यभिमानं संत्याज्येदानीं देहस्वी

कारेणाहंकारमपि त्याजयित्वा परमानुग्रहं कर्त्तुमिच्छति
न चान्येन तुल्योन्यः कोपि सत्यसंधो धीरो वास्तीति तद्यशः

६५

५ त्रिपदविषयाव्याजया आकपटयाज्ञातया स्वभर्तुर्वलेर्महीं हृतां दृष्ट्वा ऊचुः किमूचुः तदाह नवै

जांववान्नृक्षराजस्तु भेरीशब्दैर्मनोजवः विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ५ महीं
सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ऊचुः स्वभर्तुरसुरा दीक्षितस्यातिमर्षिताः ६ नवाअयं
ब्रह्मवंधुर्विष्णुर्मायाविनांवरः द्विजरूपप्रतिछन्नो देवकार्यं चिकीर्षति ७ अनेन याचमा
नेन शत्रुणा वटुरूपिणा सर्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य वर्हिसि ८ सत्यव्रतस्य सततं दीक्षि
तस्य विशेषतः नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ९ तस्मादस्य वधो धर्मो भर्तुः सु
श्रूषणं च नः इत्यायुधानि जगृहुर्वलेरनुचरासुराः १० ते सर्वे वामनं हंतुं शूलपट्टिशपा
णयः अनिछतो वले राजन् प्राद्रवञ्जातमन्यवः ११ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृ
प प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः १२ नंदः सुनंदोऽथ जयो विजयः प्रवलो वलः
कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट् जयंतः श्रुतदेवश्च पुष्पदंतोऽथ सात्वतः सर्वे नागा
युतःप्राणाश्चमूं ते जघ्नुरासुरीं १३

इतिसार्द्धैस्त्रिभिः ७ ८ ९ अनुचराश्चतेऽसुराश्च १० ११ १२ १३ ॥ ऽऽ ॥ ऽऽ॥ ऽऽ॥ एधारा

भा० अ०
६६

इत्यष्टमेएकविंशः॥२१॥ द्वाविंशेतुप्रसन्नंसन्तंप्रस्थाप्यसुतलेवलिं दत्वावरान्हरिर्न्यूनंगत्वात्द्वारस्थोऽभव
त् समर्पितमनुवित्तंनिर्मलाचलभक्तितः छलितोवलिनाचित्रंस्वमेवापियदच्युतः भिद्यमानेःसत्योऽप्यल्प
मानः १ हेउत्तमश्लोकेतिकटाक्षः ममवचः ईरितंप्रतिश्रुतं नतावद्व्यलीकं त्वयाकपटेनवामनतयामितित्वा
रूपांतरस्याविस्फुतत्वात् एवमपियदिभवान्व्यलीकंमन्यसे तथापिऋतमेवाहंकरोमि सदुक्तंविप्रलंभन

इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेवलिनिग्रहेएकविंशोध्यायः॥२१॥ श्रीशुकउवाच॥ एवंवि
प्रकृतोराजन्वलिर्भगवतासुरः भिद्यमानोऽप्यभिन्नात्माप्रत्याहाविक्लवंवचः॥१॥ वलिरुवाच॥ य
द्युत्तमश्लोकभवान्ममेरितंवचोव्यलीकंसुरवर्यमन्यते॥ करोम्यृतंतन्नभवेत्प्रलंभनंपदंतृतीयंकु
रुशीर्ष्णिमेनिजं २ विभेमिनाहंनिरयात्पदच्युतोनपाशवंधाद्व्यसनाद्दुरत्ययात्॥ नैवार्थकृच्छ्रा
द्भवतोविनिग्रहादसाधुवादाद्भृशमुद्विजेयथा॥३॥ नभवतु मेशीर्ष्णिनिजंतृतीयंपदंकुरु नचहन्यं
विश्वक्रान्तवतोमेशिरःपदपर्याप्तंनभवतीतिमन्येथा वित्तेनचेत्पदद्वयंजातं तर्हीदमधिकमेवस्यात् वि
त्तादपिवित्तवतोऽधिकत्वादितिभावः २ ननुच आपदर्थंधनंरक्षेद्दारान्रक्षेद्धनैरपि आत्मानंसततंरक्षेद्दा
रैरपिइत्यादिवचनादात्मभयपरिहारायसर्वस्वंत्यज्यते त्वंतुकुतोभीतःसन्नात्मानमर्पयसि अतआह विभे
मीति असाधुवादात् अपकीर्त्तेर्यथाऽहंभृशमुद्विजे तथानिरयादिभ्योनविभेमि ३॥ ६६

प्रख्यापनार्थं किं विधातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं ववंधेति सूत्येहनि सोमाभिषवे दिने २२ रो
रोदस्योर्द्यावापृथिव्योः २३ २४ २५ असौ सूर्यः २६ मयाक्रान्तमनेत्यन्वयः व्यापिनेत्यर्थः खं च दिशश्च तनो

हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं गृह्यमाणेऽसुरपतौ विस्नुना प्रभविस्नुना ॥२३॥ तं वद्धं
वारुणैः पाशैर्भगवानाह वामनः नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥२४॥ श्रीभगवानुवाच ॥
पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय २५ या
वत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः यावद्वर्षति पर्जन्यस्तावती भूरियं तव २६ पदैके
न मयाक्रान्तो भूर्लोकः खं दिशस्तनोः स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना २७ प्रति
श्रुतमदातुस्ते निरये वास इष्यते विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः २८ वृथा मनो
रथस्तस्य दूरः स्वर्गः पतत्यधः प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते विप्रलब्धो ददामी
ति त्वयाहं चाढ्यमानिना तद्व्यलीकफलं भुंक्ष्व निरयं कतिचित्समाः २९

त्वन्वाते स्वं त्वदीयं स्वं २७ गुरुणा च शुक्रेणानुमोदितः सन् २८ एवमुक्तेऽपि निरयपरिहारार्थं स्वर्गाद्भ्रं
शपरिहारार्थं च मनोरथं कुर्वंतं प्रत्याह वृथेति यः प्रतिश्रुतस्यादानेनार्थिनं विप्रलंभते तस्य मनोरथोऽ

ति १

त

भा० श्र० देहादीनामसारतां निश्चित्याकुतोभयं ध्रुवं च भवतः पादपद्ममेव प्रपेदे अथ तस्मादहमपि दैवेनैतस्यैव भागयेन त्वां
६७ तिकं नीत इति चतुर्णामन्वयः अंततः आयुषोऽते रिक्थहारैः पुत्रैरिह गृहेषु केवलमायुषो व्यय एव न तु सुखं किं
तिकं नीत इति चतुर्णामन्वयः अंततः आयुषोऽते रिक्थहारैः पुत्रैरिह गृहेषु केवलमायुषो व्यय एव न तु सुखं किं
चित् ९ स प्रसिद्धो महान् स्वपक्षं त्यकुलं त्तपयतीति तथा तस्यापि ९ प्रसभं बलात्कृत्या जिता श्रीर्यस्य यया श्रि

किमात्मनानेन जहातियोऽतंतः किं रिक्थहारैः स्वजनाख्यदस्युभिः किं जाययासंसृतिहेतुभू
तया मर्त्यस्य गेहैः किमिहायुषो व्ययः ९ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः
पादपद्मं ध्रुवं प्रपेदे ह्यकुतोभयं जनाङ्गीतः स्वपक्षतपनस्य सन्तमः ९ अथाहमप्यात्म
रिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ९ दंक्रान्तान्तिक वर्तिनी वितर्यया ध्रुवं ध्वस्तमति
नेवुध्यते ॥ ७ ॥ चा ॥ श्रीमुकुन्दवाच ॥ तस्याथ भाषमाणस्य प्रद्युम्नो भगवत्प्रियः आजगाम कुरुश्रेष्ठ
राकापतिरिवोत्थितः ॥ ८ ॥ तं सिद्धसेनः स्वपितामहश्रिया विराजमानेन लिनायतेक्षणं प्रांशुं पिशंगाम्ब
रमञ्जनत्विषं प्रलम्बबाहुं सुभगर्षभेक्षत न १० तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणेनोपजहार
पूर्ववत् ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखोऽवमत्वह ११

यास्तव ध्रुवमतिः सन् पुमानिदं जीवितं अध्रुवं न बुध्यते कथं भूतं कृतांतस्यांतिकं वर्तिनीमत्योः सन्निहितम्
७ ८ राकापतिः पूर्णेन्दुः ९ अञ्जनत्विषं श्यामं सुभगर्षभ सुभगश्रेष्ठं १० स्वकृताहंकाररूपापराधस्मरणेन

[illegible] ११ ६७

ननु मयानिग्रहात् नवापकीर्त्तिर्जातेव नैवेत्याह पुंसामिति अर्हत्तमैरर्पितं दंडमात्रादयोपि न हि आदिशंति नैवा
र्पयंति हितैषिणा त्वया निगृहीतोहं श्लाघ्य एवास्मीति भावः ४ ननु अहं देवानां हितैषी नासुराणां तत्राह त्वं नूनमि
ति परोक्षः शत्रुच्छलेन वर्त्तमानः ५ शत्रुत्वं पुनर्भक्तानिवास्माननुगृहीतुमेवेत्याह यस्मिन्निति उ अहो ह प्र
सिद्धं ६ अतो नात्र मम लज्जा नापि दुःखमित्याह तेनेति गुरुणा भवता ७ किंच योयं दंडरूपो ममानुग्रहस्त्वयाकृ

पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं यं न माता पिता भ्राता सुहृदश्चादिशंति हि ४ त्वं नूनमसु
राणां नः परोक्षः परमो गुरुः यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ५ यस्मिन्वैरानुबंधेन
रूढेन विबुधेतराः बहवो लेभिरे सिद्धिं यामु हैकांतयोगिनः ६ तेनाहं निगृहीतोऽस्मि भवता भू
रिकर्मणा बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ७ पितामहो मे भवदीयसंमतः प्रह्लाद आवि
ष्कृतः साधुवादः भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ८

तः स तु त्वद्भक्तपौत्रत्वेन न त्वहमनुग्रहस्य पात्रमित्याशयेनाह पितामह इति भवदीयानां संमतः य
तः आविष्कृतः साधुवादो यस्य त्वमेव परम आश्रयो यस्य सः अतो भवतो विपक्षेण विद्विषा हिरण्य
कशिपुना तिचित्रं वैशसं हिंसां संप्रापितोपि ८ ॥ रामराम राम ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

भा० अ०
६८

त्रिजगतः कुतः प्रभोः पालकस्य अस्यतः संहर्तुश्च ईश्वरस्य तवान्यं किमावहंति किं समर्पयंति त्वयावरोपित
कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमात्रमपि येषु ते अयं भावः लोकत्रयं मयार्पितं तृतीयपादाय देहं सम
र्पये प्रतिश्रुतमृतं करोमि इति देहादिषु स्वाप्याविकारेण ब्रुवन्नयं कुबुद्धिर्निर्लज्जश्च यतस्त्वमेव सर्वस्यापि स्वा

विंध्यावलिरुवाच ॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः कर्तुः प्र
भोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥१७॥ ब्रह्मोवाच ॥ भूतभावन भूतेश दे
वदेव जगन्मय ॥ मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं ॥१८॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिता
श्चये निवेदितं च सर्वस्वमात्माविक्लवया धिया १९ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैर
पि विधाय सतीं सपर्यां अप्युत्तमां गतिमसौ भजति त्रिलोकीं दाश्वानविक्लवमनाः कथमार्त्तिमि
च्छेत् २०

मी अतो मंदबुद्धिमेनं केवलं कृपया विमुंच्य पालयेति १७ तदेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोक्तियोः प्रसन्नो हरिः
ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयति भूतभावनेति त्रिभिः १८ निग्रहानर्हत्वे हेतुः कृत्स्नेति सर्वस्वमेवाह आत्मे
ति १९ तदेवं कैमुत्यन्यायेनाह यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वो जनः उत्तमां गतिं प्राप्नोति तस्मै
तुभ्यमसौ बलिस्त्रिलोकीं दाश्वान् दत्तवान् आर्त्तिं कथं प्राप्नुयात् २०

६८

शिरसा नमन्नेव उपेत्य मूर्ध्ना ननाम वस्तेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विक्लवः १२ त्वयैवेति न
ह्यैन्द्रं पदमेतदीयं त्वयापहृतं किंतु स्वीयमेव पुनः स्वीकृतं तच्च शोभनमेव कृतं तत्र हेतुः मन्य इति यद्यस्मात्
श्रिय एवात्ममोहनं तस्माद्विभ्रंशितः मोहनत्वमेवाह यया श्रिया विद्वानपि संयतोऽपि मुह्यते तत्तस्याः कोन्य

स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥ १२ ॥ प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ १३ ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥ १४ ॥ श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृताञ्जलेः हिरण्यगर्भो भगवानुवाच मधुसूदनं १५ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविक्लवा प्राञ्जलिः प्रणतोपेन्द्रं बभाषेवाङ्मुखी ह्रिया १६

पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति १३ तस्मै महाकारुणिने १४ तस्य प्रह्लादस्यानुशृण्वत एव तं उवा
चेति किंचिद्वक्तुं प्रवृत्तस्येत्यर्थः १५ तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता तं च सन्मायन हिरण्यगर्भः त्वरणं तस्मीस्थि

१न

भा० अ०
६९

२६ नह्येतस्मिन्कुले कश्चिन्निःसत्वः कृपणः मानीत्यादिना छलैरेव मया धर्मयुक्तः तथापि तं धर्मं मयं न त्य
जति मे मया २७ अहमेवाश्रयः पालकोऽयस्य सः स्थानं प्रापित इतियदुक्तं तदेवस्थानमाह तावत्सावर्णिमन्वं
तरपर्यंतं सुतलमध्यास्ता अधिवसतु विधेयः २८ यद्यस्मिन्निवसतां आध्यादयो ममेक्षया न संभवंति २९

क्षीणरिक्थश्च्युतः स्थानात् क्षिप्तो बद्धश्च शत्रुभिः ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः गु
रुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः २६ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥
एष मे प्रापितः स्थानं दुष्प्रापममरैरपि २७ सावर्णेरंतरस्यायं भविता इंद्रो मदाश्रयः ताव
त्सुतलमध्यास्तां विश्वकर्मविनिर्मितं २८ यत्राधयो व्याधयश्च क्लमस्तंद्रा पराभवः नोपस
र्गा निवसतां संभवंति ममेक्षया २९ इंद्रसेन महाराज याहि भो भद्रमस्तु ते सुतलं स्वर्गिभिः
प्रार्थ्यं ज्ञातिभिः परिवारितः ३० न त्वामभिभविष्यंति लोकेशाः किमुतापरे त्वच्छासनातिगान्
दैत्यांश्चक्रं मे सूदयिष्यति ३१ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदं सदा संनिहितं वीर तत्र मां

एवं ब्रह्माणं प्रत्युक्त्वा करुणापरवशः साक्षाद्बलिं प्रत्याह इंद्रसेनेति चतुर्भिः द्रक्ष्यते भवान् ३२
३० त्वच्छासनमधिगच्छंति अतिवर्तंत इति तथा तान् ३१ तथापि भगवद्वियोगात्तदनिष्टं तं प्रत्याह सदेति ३२

६९

भ२

तस्य विशः अर्थान् ननु अर्थापहारः कोयमनुग्रहस्तत्राह यन्मद इति यैरर्थैर्मदो यस्य सः अत एव स्तब्धः अन
म्रः सन् मदस्तं हे तत्तनामर्थानामपहार एवानुग्रह इत्यर्थः २१ दुर्लभं पुरुषजन्म कथंचिल्लब्धवतो जीवस्य
जन्मादिनिमित्तो गर्वो महाहानिकरस्तस्य च नाशो मदनुग्रहादेवेत्याह यदेति द्वाभ्यां अनीशः परतंत्रः सन् नि
जैः कर्मभिर्नानायोनिषु कृमिकीटादिषु संसरन् २२ तत्र पौरुषीं गतौ जन्मादिभिरस्य यदि स्तंभो न भवेत् तर्हि अयं मद

श्रीभगवानुवाच ॥ ब्रह्मन् यमनुगृह्णामि तद्विशो विधुनोम्यहं ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चा
वमन्यते २१ यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः नानायोनिष्वनीशोयं पौरुषीं गतिमा
व्रजेत् २२ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः २३
मानस्तंभनिमित्तानां जन्मादीनां समंततः सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः २४ एष दा
नवदैत्यानामग्रणीः कीर्त्तिवर्द्धनः अजैषीदजयां मायां सीदन्नपि न मुह्यति २५

नुग्रह एव २३ कथं तर्हि ध्रुवादिभ्योऽर्थसंपदो ददासीति चेत्तत्राह मान इति स्तंभः अनम्रता तस्य निमित्तभू
तानां समंततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्त्वेपि जन्मादिभिरित्तिवा हंत हे ब्रह्मन् मत्परो न मुह्येत् अतो
भक्तस्येच्छया संपदोपि ददामि अभक्तस्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः २४ अस्य चेद
नीमत्परत्वान्मोहं प्राप्य मे पि दास्यामीति च बलेस्तस्य माहाभावमाह एष इति त्रिभिः २५ ॥ ६६ ॥ ६६ ॥

भा० स्कं० ७०

५ दुर्गपालोऽसि रक्षिष्येसर्वतोऽहमित्युक्तत्वात् ६ हे शरण्द आश्रयप्रद ये कुसृतयः दर्हेताः खलयोनयः उग्रजात्य
श्चते वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवी कस्माद्धेतोः प्रणीताः वर्द्धमानेन स्वतानुवर्त्तनं दाक्षिण्यं तेन या दृष्टिस्तद्वि
षयत्वं प्रापिताः ७ भक्तप्रियत्वादिति चेत्तर्हि एवं तवेहितमहो चित्रं किं तत्र सर्वात्मनः समदृशश्च स्वभावो विषमइति

लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ प्रह्लाद उवाच ॥ ने
मं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ये यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवं
दितांघ्रिः ६ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः कस्माद्वयं कुसृतयः
खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ७ चित्रं तवेहितमहोऽमितयोगमायालीला
विसृष्टभुवनस्य विशारदस्य सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्व
भावः ॥ श्रीभगवानुवाच ॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयं मोदमानः स्वपौत्रेण ज्ञातीनां
सुखमावह ॥ ९ ॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितं मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः १०

यत्सर्वात्मत्वे चित्रचरितत्वे च हेतुः अमिता अचिंत्या योगमाया तस्या या लीला तया विसृष्टानि विरचितानि भुवना
नि येन तस्य अहो इत्याश्चर्ये सधिरार्षः समदृक्त्वे हेतुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि तव वैषम्यं नास्ति व
यतः कल्पतरुस्वभावः सन् भक्तप्रियोऽसि नहि कल्पतरुराश्रितानामेव कामान् पूरयन्नपि विषमो भवतीत्यर्थः ८ ९

८५

७०

संगाद्युत्रासुरोभावःसविनंक्ष्यति ॥३६॥ इत्यष्टमेद्वाविंशः ॥२२॥ त्रयोविंशेबलौयातेसुतलंसपितामहे उपेंद्रेणादिवंगत्वा
सर्ववन्मोदतेहरिः बाष्पस्यकलाभिःविंदुभिराकुलेइक्षणेयस्य भक्त्योत्कलःउत्कंठः १ अहोप्रणामायस्यमहिमा
यदर्थेकृतसमुद्यमएवप्रपन्नानांभक्तानांयोर्थः तस्यविधौअभक्तेपितस्यसंपादनेसमाहितः अप्रमत्तःस्थितः

तत्रदानववैदैत्यानांसंगात्तेभावआसुरः दृष्ट्वामदनुभावंवैसद्यःकुंठोविनंक्ष्यति ३६ ॥ इतिश्रीमद्भागवतेम
हापुराणेअष्टमस्कंधेबलिमोक्षणंद्वाविंशोध्यायः ॥२२॥ श्रीशुकउवाच ॥ इत्युक्तवंतंपुरुषंसनातनं
महानुभावोखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणोभक्त्युत्कलोगद्गदयागिराब्रवीत् ॥१॥ बलिरु
वाच ॥ अहोप्रणामायकृतःसमुद्यमःप्रपन्नभक्तार्थविधौसमाहितः यल्लोकपालैस्त्वदनुग्रहोमरै
रलब्धपूर्वोऽपसदेऽसुरेर्पितः २ श्रीशुकउवाच ॥ इत्युक्त्वाहरिमानम्यब्रह्माणंसभवंततः विवेश
सुतलंप्रीतोबलिर्मुक्तःसहासुरैः ३ एवमिंद्रायभगवान्प्रत्यानीयत्रिविष्टपं पूरयित्वादितेःकाममशा
सत्सकलंजगत् ४

यत्ययेनोद्यमेनलोकपालैरमरैःसत्वप्रधानैरपिअलब्धपूर्वस्त्वदनुग्रहः अपसदेनीचेराजसेमयिअर्पितः अयंभा
वः परमेश्वरायतुभ्यमहंवराकस्त्रिलोकींदत्तवान् इत्येतदास्तां प्रणामोपिनसम्यक्कृतः किंतुतदर्थमुद्यममा
त्रेकृते तेनचकर्मतपोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहःसंपादितः अहोत्वत्प्रणामप्रभावाश्चर्यमिति २ ३
अशासत् उपेंद्रस्सन्पालयामास ४ ॥ ss

देवाश्च ऋषयश्च भूमिपाश्च मनवस्तैः सहितः १९ न तु लोकादीनां पतिरिंद्रोऽस्त्येव सत्यं तथापि देवादीनां कल्यं दृष्ट्वा
वामनमुपेंद्रं कल्पयांचक्रे २० २१ देवयानेन मार्गेण विमानेन इति वा २२ २३ २४ एतच्च चरितं सर्वमाख्यातमिति

प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च कश्यपस्यादि
तेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिं १९ वेदानां सर्वदेवानां धर्मस्य
यशसः श्रियः मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये २०
तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप २१ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं लोकपालै
र्दिवं निन्ये ब्रह्मणा चानुमोदितः २२ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः श्रिया परमया जु
ष्टो मुमुदे गतसाध्वसः २३ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप पितरः सर्वभूतानि सि
द्धा वैमानिकाश्च ये सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानि स्वानि ते जग्मुरदितिं च श
शंसिरे सर्वमेतन्मयाख्यातं भवतः कुलनंदन उरुक्रमस्य चरितं श्रोतृणामघमोचनं २५ पा
रं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः २६

शेषोक्त्या अन्यान्यपि संतीत्युक्तं तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह पारमिति उरुवक्रुधा विक्रम
तो विस्तीर्णस्य महिम्नः पारं यो गृणन्मो भवति स मर्त्यः पार्थिवानि रजांसि विममे गणितवान् २६

११। १२ कर्म वितन्वतः शिष्यस्य यच्छिद्रं मंत्ररंध्रं न्यूनं ज्ञातं तत्सन्तनु विस्तारय संधत्स्व यजमानं विनाकथं संधातव्यमिति तन्नवाच्य
मित्याह यत्तदिति ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव सम्यं भवेत् किंपुनरनुष्ठितमित्यर्थः १३ भगवान्यस्य सर्वेणापि भावेन च सुमा
वेण पूजितः तस्य कर्मसु कुतो वैषम्यं कथंभूतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशो यज्ञफलदः यज्ञमयश्च पुरुषः १४ आस्तां

श्रीशुक उवाच ॥ आज्ञां भगवतो राजन्प्रह्लादो बलिना सह बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः परिक्र
म्यादिपुरुषं सर्वासुरचमूपतिः प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं ११ अथाहोशनसं राजन्हरिर्नारायणो
ऽन्तिके आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां ॥ १२ ॥ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः य
त्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत ॥ १३ ॥ शुक्र उवाच ॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् यज्ञेशो
यज्ञपुरुषः सर्वभावेन पूजितः १४ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः सर्वं करोति निश्छिद्रमनुसं
कीर्तनं तव १५ तथापि वदतो भूमन्करिष्याम्यनुशासनं एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनम् १६ अ
भिनंद्य हरेराज्ञामुशना भगवानिति यज्ञछिद्रं समाधत्त बलेर्विप्रर्षिभिः सह १७ एवं बलेर्महीं राजन्भिक्षि
त्वा वामनो हरिः ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत्परैर्हृतं १८

तावत्पूजा यस्मात्मंत्रतः स्वरादिभ्रंशेन तंत्रतः व्यतिक्रमादिना देशतः कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षि
णादिना यत्तच्छिद्रं न्यूनं तत्सर्वं तवानुकीर्तनमात्रमेव निश्छिद्रं करोति १५ १६ इति हरेः राज्ञा प्रतिनंद्य बलेर्यज्ञ
छिद्रं समाधत्त संदधे पाठांतरे समाधाय तामाज्ञां सं
पादितवानित्यितिशेषः १७ १८

भा॰ अ॰ ४ सामान्येनावतारप्रयोजनमाह गोविप्रेति ५ जुगुप्सितत्वं परिहरति धियो गुणैर्योऽनुच्चावचानि रूपाणि तेषु नियंतृ
१७२ त्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् कुतः पुनः शुद्धसत्वमये मत्स्याद्याकारे रुच्चावचशंकेति भावः ६ विशेषतो
मत्स्यावतारप्रयोजनमाह आसीदिति त्रिभिः ब्रह्मणो निद्रायां भवो ब्राह्मस्तेनैव निमित्तेन जातो नैमित्तिकः समुद्रेउपप्लु

सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान्बादरायणिः। उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ॥ ४ ॥ श्रीशु
क उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः। रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उ
च्चावचेषु भूतेषु चरन्वायुरिवेश्वरः। नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ६ आसीदतीतक
ल्पांते ब्राह्मो नैमित्तिको लयः। समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७ कालेनागतनिद्रस्य धा
तुः शिशयिषोर्बली। मुखतो निःसृतान्वेदान्हयग्रीवोंऽतिकेऽहरत् ८ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीव
स्य चेष्टितं। दधार शफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान्
नारायणपरोऽतप्यत्तपः स सलिलाशनः १० योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः। श्राद्धदेव इ
ति ख्यातो मनुत्वे हरिणार्पितः ११ एकदा कृतमालायां कुर्वतो जलतर्पणं। तस्यांजल्युदके काचि
च्छफर्येकाभ्यपद्यत १२

तानिमग्नाः ७ अंतिके निःसृतान् ८ शफरीरूपं मत्स्यरूपं ९ प्रयोजनांतरं लीलाप्रकारं चाह तत्र राजर्षिरि
त्यादि यावत्समाप्तिः १० स एव श्राद्धदेव इति ख्यातः ११ कृतमालायां नद्यां १२ ॥ ऽऽ ॥ ऽऽ ॥ १७२

न १

यथापार्थिवपरमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमप्यशक्यमित्यर्थः तथाच मंत्रः विष्णोर्नुकंवीर्याणीति एतदेवमंत्रो
नरार्थंसंचयन्नाह यस्य पुरुषस्य पूर्णस्य महिम्नः पारं तत्त्वं देव ऋषिर्वशिष्ठ इति एवमाह कथं किंजायमानो जातो वा उपैति
न कोपि इति वदन्ननंतत्वे नैवाहेत्यर्थः तथाच मंत्रः न ते विष्णो जायमानो न जातो देव महिम्नः पारमंतमाप्नोति २६ यद्दं
प्र एवं भवति स परां गतिं याति २७ सुकृतं यथावत्कृतं विदुः ष्टादशमे त्रयविंशः ॥२३॥ चतुर्विंशे प्रसंगे न मत्स्यरूपस्य शृङ्गि

किंजायमान उत जात उपैति महत्त्वं इत्याह मंत्रे ऋषिः पुरुषस्य यस्य २९ यद्दं देवदेवस्य हरेरद्भुतकर्मणः श्र
वतारानुचरितं स एवं न याति परं भाति ३० क्रियमाणे कर्मणीदं दैवे पैत्र्ये थ मानुषे यत्र यत्रानुकीर्त्यते तत्
पांसु कृतं विदुः ष्ट इति श्रीमद्भागवते महापुराणे ष्टमस्कंधे वामनावतारचरिते त्रयोविंशोध्यायः २३
राजोवाच ॥ भगवन्श्रोतुमिच्छामि हरेरद्भुतकर्मणः अवतारकथामाद्यां मायामत्स्यविडंबनां १ ॥ यदर्थम
दधाद्रूपं मात्स्यं लोकजुगुप्सितं तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥२॥ एतन्नो भगवन्सर्वं यथावद्
वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ३

णः लीलोच्यते यतः सत्यव्रतरक्षा महार्णवे तत्कृतं तन्नु निर्दिश्य पादौ निजैश्वर्यनिदर्शनात् मत्स्यं पृच्छति पृथ्वीशो लीला
यावामनोपमं मायया मत्स्यविडंबनं मत्स्यरूपानुकरणं यस्यां निरूप्यते तां १ ननु कस्मादकस्मादेव मत्स्यावतारश्रवणे
च्छा श्रीवामनसादृश्यादित्याह यदर्थमिति द्वाभ्यां दुर्मर्षं दुःसहं २ बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति

कैमुते यद् चैतल्लोकजुगुप्सितं मात्स्यं रूपमस्यासीत्
एतन्नोपपत्तावदृष्टमहेंद्रसीत्यर्थः ३

भा० अ० २४ २५ अभिव्यानशे अभितो व्याप्तवान् २६ २७ मुख्यः सत्यः आत्मा च गतिश्च आश्रयः २८ २९ हे अरविंदाक्ष पृथगात्म
७३ नां देहाद्यभिमानिनां सतामितरेषां पदोपसर्पणं यथा मृषा भवेत् तथा सर्वसुहृत्प्रियात्मनस्तव पदोपसर्पणं मृषा न भ

क्षिप्यमाणस्तमाहेदमिह मां मकरादयः अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि २४ एवं विमोहितस्तेन
वदता वल्गुभारतीं तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् २५ नैवंवीर्यो जलचरो दृष्टोस्मा
भिः श्रुतोपि वा यो भवान्योजनशतमह्नाभिव्यानशे सरः २६ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोव्ययः
अनुग्रहाय भूतानां धत्से रूपं जलौकसां २७ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर भक्तानां नः
प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥२८॥ सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ज्ञातुमिच्छाम्यदो रू
पं यदर्थं भवता धृतं ॥२९॥ न तेरविंदाक्ष पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषां पृथ
गात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥३०॥ श्रीशुक उवाच ॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्य
व्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियं ॥३१॥ श्रीभगवा
नुवाच ॥ सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ३२

वेत् यद्यस्मान्नो भक्तानामद्भुतं वपुरदीदृशः दर्शितवानसि पाठांतरे पृथगात्मनो भेददर्शिनः पुंसः असतां परिच्छि
न्नानां पदोपसर्पणं यथा मृषेत्यर्थः ३० एकांतजना भक्ताः प्रिया यस्य ३१ अप्ययांभोधौ प्रलयार्णवे भूर्भुवरादिकमि

का २

१२ १४ १५ १६ १७ यत्राहंसुखंनिवसामितदोकः स्थानंकल्पय १८ औदंचनोदकेमणिकस्थेजले १९ २० २१

सत्यव्रतोंऽजलिगतांसहतोयेनभारत उत्सस्रर्जनदीतोयेशफरींद्रविडेश्वरः १२ तमाहसा
तिकरुणंमहाकारुणिकंनृपं १३ यादोभ्योज्ञातिघातिभ्योदीनांमांदीनवत्सला कथंविसृजसेराज
न्भीतामस्मिन्सरिज्जले १४ तमात्मनोनुग्रहार्थंप्रीत्यामत्स्यवपुर्धरं अजानन्रक्षणार्थायसफर्याः
समनोदधे १५ तस्यादीनतरंवाक्यमाश्रुत्यसमहीपतिः कलशाप्सुनिधायैनांदयालुर्निन्यआश्र
मं १६ सातुतत्रैकरात्रेणवर्द्धमानाकमंडलौ अलब्ध्वात्मावकाशंवाइदमाहमहीपतिं १७ नाहं
कमंडलावस्मिन्कृछ्रंवस्तुमिहोत्सहे कल्पयौकःसुविपुलंयत्राहंनिवसेसुखं १८ सएनांततआदा
यन्यधादौदंचनोदके तत्रक्षिप्तामुहूर्तेनहस्तत्रयमवर्द्धत १९ नमएतदलंराजन्सुखंवस्तुमुदंच
नं पृथुदेहिपदंमह्यंयत्वाहंशरणंगता २० ततआदायसाराज्ञाक्षिप्ताराजन्सरोवरे तदावृत्यात्मना
सोऽयंमहामीनोन्ववर्द्धत २१ नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः निधेहिरक्षायोगेनह्रदेमाम
विदासिनि २२ इत्युक्तःसोनयन्मत्स्यंतत्रतत्राविदासिनि जलाशयेसंमितंतंसमुद्रेप्राक्षिपज्झषं २३

रक्षायायोगेनोपायेनयथामहाह्रदप्राप्तेरर्वाक्जलंविनानम्रियेयं तेनोपायेननिधेहि अविदासिनि अनपह्रये २२ संमि

ततज्जलाशयपरिमितंसंतं २३

हं ९६

भा-स्क०
७४
सागरं तारयंते तेंतरिष्यभवसागरं सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति तत्र ता
वद्गहोल्लयं इति योसावस्मिन्महाकल्पइति चोक्ते महाप्रलयइति प्राप्तं नेतिब्रूमः महाप्रलये पृथिव्यादीनामवशेषासं
भवात् यावद्ब्राह्मीनिशेत्यादि युक्तिविरोधाच्च अतो दैनंदिन इति युक्तं न चैतदपि संगच्छते सावर्त्तकैस्नाष्टऽप्याद्दिभिर्विनाऽके
ती४ स्माद्देवस्वप्नमेरनिते लोकीनिमज्ज्यंतीति मत्स्यात्केरनुपपत्तेः यथोक्तं प्रथमस्कंधे रूपं स जगृहे मात्स्यं चाक्षुषोदधिसं
प्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्मिति तदपि तदा दुर्घटं नहि प्रलयद्वयेपि महामहीमय्या नाव्या रोहः सं
भवति नवा चाक्षुषे मन्वंतरे प्रलयोऽस्ति तथा च सप्तिसप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् तत्र वदोषधीः सर्वा इ
त्यादिनिर्देशोपि न संगच्छते नहि तदा ओषध्यादीनां सत्वानां चावशेषः संभवति तस्मादन्यथा वर्ण्यते नैवायं वास्त

राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृछयेहोपसताय
माप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥४६॥

वको पि प्रलयः किंतु सत्यव्रतस्य ज्ञानाद्युपदेशा
याविर्भूतो भगवान्वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शि
तवान् तदपेक्षयैव च महाकल्पेऽस्मिन्निति विशेषणं संगच्छते तथाच ततः समुद्र उद्वेलः सर्वतः समदृश्यतेति
तस्यैव तथादर्शनमुक्तमित्येषादिक् प्रस्तुतं स्तोत्रं व्याख्यामः तत्र नानायोनिषु संसरतः स्वस्य भगवत्कृपयैव तत्प्राप्ति
दृष्ट्वा मुक्तये तमेव प्रार्थयते अनादीति अविद्यया उपहता आत्मसंविद्येषां ते अत एवाविद्यामूलेऽस्मिन्संसार
परिश्रमेणातुराः इह संसारे यदृछया यदनुग्रहादेव उपसृता आसन्तः संतो यं प्राप्नुयुः स भवानेव साक्षान्नोगु ७४

[illegible]

संवर्त्ताभसि प्रलयोदके त्वामुपस्थास्यसि प्राप्स्यसि ३३ ओषधीः आदायेति शेषः ऋषीणामेवालोकेन विचरिष्यसि ३४ म

त्रिलोक्यां लीयमानायां संवर्त्ताभसि वै तदा उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ३३ त्वं तावदोषधीः सर्वा
बीजान्युच्चावचानि च सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः एका
र्णवे निरालोके ऋषीणामेव वर्चसा ३४ दोधूयमानां तां नावं समीरेण बलीयसा उपस्थितस्य मे शृंगे निब
ध्नीहि महाहिना ३५ अहं त्वामृषिभिः साकं सहनावमुदन्वति विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो
३६ मदीयं महिमानं च परं ब्रह्मेति शब्दितं वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ३७ इत्थमादिश्य
राजानं हरिरंतरधीयत सोन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ३८ आस्तीर्य दर्भान्प्राक्कूलान्राज
र्षिः प्रागुदङ्मुखः निषसाद हरेः पादौ चिंतयन्मत्स्यरूपिणः ३९ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं
वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत ४० ध्यायन्भगवदादेशं ददृशे नावमागतां तामारुरोह विप्रेंद्रैरा
दायौषधीवीरुधः ४१ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं स वै नः संकटादस्मादविता शं विधास्य
ति ४२ सोनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ४३ निबध्य
नावं तच्छृंगे यथोक्तो हरिणा पुरा वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनं ४४

हाहिना वासुकिना ३५ ३६ मे मयानुगृहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि त्वया कृतैः संप्रश्नैर्मे यावद्विवृतं प्रकाशितं

४४

भा॰ अ॰ तदेवं दृष्टांतेनस्पष्टयन्नाह अचक्षुरिति अविदुषो जनस्य अबुधोऽविद्वान् गुरुस्तथैव अर्कप्रकाशवत्त्वमेव दृक्
७५ ज्ञानं यस्य स अर्कदृक् अतस्सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः अत एव सुगतिं बोद्धुमिच्छद्भिर्नोऽस्माभिर्गुरुर्वृ
तोसि ४९ किंच प्राकृतो गुरुरनर्थहेतुरित्याह जन इति आदिशते उपदिशति असतीं मतिं अर्थकामादिमतिं तमः

अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः त्वमर्कदृक्सर्वदृशां समीक्षणो वृतो गुरुर्नः त२
स्वगतिं बुभुत्सतां ४९ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः त्वं त्वव्ययं ज्ञानममोघमंज
सा प्रपद्यते येन जनो निजं पदं ५० त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः तथा
पि लोको न भवेत्तसंधधीर्जानाति संतं हृदि बद्धकामः ५१ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधना
८३४ य छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृहि स्वमोकः ५२ श्रीशुक उवाच इत्युक्तवंतं नृपतिं भग
वानादिपूरुषः मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीं स
त्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५३ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयं नाव्यासीनो भग
वता प्रोक्तं ब्रह्म सनातनं ५४

संसारं ५० ननु तर्हि सर्वोपि लोको मामेव किं नोपसरति अत्तानादित्याह त्वमिति प्रियश्चासावीश्वरश्च ५१ अहं तु त्वामे ७
व शरणं यामीत्याह तं त्वामिति प्रतिबोधनाय उपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदय्यान् ग्रंथीन् अहं
कारादीन् स्वमोकः स्वरूपं स्वस्य प्रकाशय ५२ नृपतिं प्रति पुराणसंहितां मत्स्यपुराणं अशेषतोऽब्रवीदित्यनुषंगः ५३ ७५

ननु वैराग्यं विना कुतो मुक्तिः न हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह अबुधो यं जनः असुखं यथा भ-
वति तथा कर्म समीहते तो सुखेच्छानो हृदयरूपं ग्रंथिं संभिद्यात् यतः स एव परो गुरुः ४६ ननु येन दानादि-
भिः सत्वशुद्धिं विना कथं ग्रंथिभेदः स्यात्तत्राह यस्य सेवयैव पुमानात्मनो मनसो मलं तमो बीजं वर्णं वस्तुस्वरूपं भ-
जेत स ईशो नो गुरुर्भूयात् यतः स एव गुरोरपि गुरुः मलहानेर्दृष्टांतः रुद्ररोदनेरजतम् यद्रोदीत्तद्रु-

जनोऽबुधो यं निजकर्मबंधनः सुखेच्छया कर्म समीहतेऽसुखं यत्सेवया तां विधुनोत्यसन्मतिं ग्रं-
थिं स भिंद्याद्धृदयं स नो गुरुः ४६ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः भजे-
त वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरुर्गुरुः ४७ न यत्प्रसादायुतभागलेशमन्ये च
देवा गुरवो जनाः स्वयं कर्त्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ४८

द्रस्य रोद्रत्वं यदवशीर्य्येत तद्रजतं हिरण्यमभवदिति श्रुतेः तद्यथाग्नेः सपर्क्कोऽन्मस्तं जहाति स्ववर्णं भज-
ते न तु क्षालनादिभिः तथा नयज्ञादिभिर्मलत्यागः किं तु त्वत्सेवयैव तेषां तु सेवांगत्वमेवेति भावः ४७ पर-
मेश्वरत्वं च परमगुरुत्वं च प्रपंचयन्नाह यत्प्रसादस्यायुतभागस्तस्य लेशमात्रमपि अन्ये देवादयः सर्वे समेता अपि

स्वयं तन्निरपेक्षाः संतः कर्त्तुं न प्रभवंति ४८

भा० अ० ७६ अतीतः पूर्वो यः प्रलयः ॥ तस्यापाये अवसाने ॥ ५६ ॥ ५७ ॥ ५८ ॥ योयं हरेरवतारस्तं यः प्रकीर्तयेत ॥ ५९ ॥ सत्यव्रत

अतीतप्रलयापाये उत्थिताय स वेधसे ॥ हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५६ ॥ स तु
सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ॥ ५७ ॥ सत्य
व्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५८ ॥
अवतारो हरेर्योयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिं ॥ ५९ ॥
प्रलयपयसि धातोः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमक
थयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि ॥ ६० ॥ इति श्रीमद्भा
गवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां अष्टमस्कंधे मत्स्यावतारचरितानुवर्णनं चतुर्वि
शतितमोध्यायः ॥ २४ ॥

स्य स्त्रषीणां च ॥ छत्रिणो गच्छंतीति वल्लिंगसमवायाद्धद्रुकथनं ॥ जिह्ममीनं मायामत्स्यं ॥ ५९ ॥ ६० ॥ इति श्री
ष्टमस्कंधे संवधिन्यां भावार्थदीपिकायां चतुर्विंशतितमोध्यायः ॥ २४ ॥ शुभमस्तु ॥ ○ ॥ ॥ ॥ ० ७६